तन्निमित्तग्रहणं कर्तव्यं तेन जाघदेमत्यपेक्षाधीनावः सामर्थ्यपरिभाषायामितिसूत्रमति
तत्तरकं नवतान्यनेन भाष्येण सूचितम्॥ व्याख्यातं च कैयटादिभिस्तथैव॥ यत्तु स्व
विधित्वादिति प्रतीकमुपादाय गस्येक इत्यत्र स्थानिनि प्रत्यये पुंच सर्वत्राकारेण वि
वक्षितः॥ आदेशांशेन विवक्षितः॥ अन्यथा निषादकर्षूत्राष्ट्रादौ ह्रेंगन्निवजरूपका

देशे कत्राष्ट्रस्य लाक्षणिकत्वात्केण इति ह्रस्वाभावप्रसक्तिरिति भावः॥ स्थान्यादेशयोरिति॥ इका
देशस्थानिभूतप्रत्यये आदेशाविधायके सूत्रे गस्येक इत्यत्र चेत्यर्थः॥ सदृशे चेदं गस्येक इति
सूत्रे भाष्यकैयटयोः इदमुपलक्षणं॥ संनिपातपरिभाषयापि कादेशावारणे बोध्यमिति न
व्यर्थं कन्तत्र॥ केण इत्यत्राप्यकारस्योच्चारणार्थत्वेन व्यंजनमात्रे ककारे ह्रस्वविधानात्तत्र
ग्रहणे णिति निषेधाल्लक्षणप्रतिपदोक्तपरिभाषायाः अप्रवृत्तेः॥ नचातिप्रसंगः॥ व्यु
त्पत्तिपक्षे राकधाकेत्यादिव्याहृत्यर्थं तद्धितग्रहणं कर्तव्यमिति वार्तिकेनैव निरासात्॥
अव्युत्पत्तिपक्षे वार्तिकाभावेऽपि ग्रहणेनेति बोध्यं॥ एवं च यथाश्रुतैव व्याख्यासंभवे तत्का
व्याख्यानमनुचितं॥ ननु तथाति ककारादितद्धितेऽतिप्रसंगस्तदवस्थ इति चेन्न॥ भाष्ये कं
तः पंतः शंग इत्यादावि कादेशाभावात्तत्सिद्ध्यर्थं गस्येक इत्यत्र स्वरितोच्चारणवत्तत्रापि स्वरितोच्चा
रणेन स्वतप्रत्ययाकारविशिष्टेयः प्रत्ययाकारस्तस्मिन्परतः ह्रस्व इत्यर्थस्वीकारेणावर्ण
स्य प्राधान्येनाश्रयणात्परिभाषाप्रवृत्तेर्नैषादकर्षुकि इत्यादिसिद्धिः॥ यद्यपि मनोरमायां ग
स्येक इत्यत्र द्विरूपविधेयेवाकास्याविवक्षितत्वं॥ तत्रादेशांशे विधित्वसंपादनार्थं विधेये
तुगप्रत्ययाकारेणैव सिद्धं व्यर्थं तदिति बोधनार्थमनुत्थरूपादानेन तुगादेशत्वावच्छेदे
न॥ एवं च यत्र प्रत्ययाकारे प्रयोजनं तत्र प्रत्ययाकारविवक्षापेक्षादेशस्थानिनि तत्र
हि कंदइत्यादिव्याहृत्यर्थस्वरितगुणोच्चारणेन सार्थक्यात्॥ यत्र स्थानिनि नप्रयोजनं॥

पयोर्द्दंद्वेगम्निनत्वान्न तत्रादेशाएव विवक्षितत्वं यथेमुमुक्षांनात्कइत्यादौ॥ एवंचनकाप्यनुप
५८ पत्तिः॥ किंच प्रत्यये: विवक्षितत्वेरस्येत्यत्राविवक्षितत्वमागतमेवैतथाचसमुच्चयार्थचका
रस्यासंगतिः यौनकत्वंचस्पष्टमेव॥ एवमिकादेशस्थानिनूतप्रत्ययेस्यादेशाविधायके
सूत्रेगस्येकइत्यत्रचेत्यर्थइतिस्थान्यादेशयोरिमस्यविवरणेपिबोध्यः॥ नचपंचमीसमा
माश्रयणेमथितयतेः क्विपिमथितावारतीत्यर्थेकिमाथितिकइतिनाप्यकुत्रूपासि
द्धिरिकादेशापवादकादेशाप्रवृत्तेरितिवाच्यम कृतेपिपंचमीसमासेत्याद्दिष्टादचःपूर्व
स्येवपरस्यापिस्थानिवद्भावेनकादेशाप्रवृत्तेनगिरूकत्वात॥ तस्मात्काष्टत्र्योवनास्त्रीपति
वन्मंथितयतेः क्विपोदन्तनिमित्तेवतत्वं॥ अस्कवामथितावरतीत्यर्थेमाथिक इत्येवरू
पंमाथितिकइतिरूपंतुमथितंपण्यमस्येत्यर्थेणवच्यतएवकैय्यटेनव्याख्यातंसन्निपा
तपरिभाषामनाश्रित्येति॥ यत्तुपरमाहवर्यस्यबलीयस्त्वादितिरिक॥ इतिमनोरमाप्रती ५८
कमुपादायदिगयक्तिगतदर्थपंचमीसमासस्यावश्यकत्वंइति॥ तथाहि॥ परस्मात्वचर्यस्य
वलवत्त्वेमानानावः॥ विप्रतिषेधसूत्रेकार्यन्नाष्टेनतत्रास्त्रीयस्येवग्रहीतुमौचित्येनान्तरत
धामेरिस्यायुक्तंनवीनेतत्त्व॥ परश्वोव्यवस्थयति॥ अचः परस्मिन्निसूत्रस्थभाष्यविरोधा
त॥ नवद्विरपिविनाषागमइनविदविशांनुदविदोदन्नेत्यादौपरमाहवर्यस्यस्वीकृतत्वा
च्च॥ नचनाप्यंपंचमीसमासेस्येनमाथितिकेन्यस्यमाधितत्वात्तव्यावत्तुपकइतिवाच्यं॥॥

तस्यतत्राग्रहानावात॥ वस्तुतस्कइसुमुक्षांतात्कइत्यत्रांगविशेषणात्तदंतविधौबांता
दितिलब्धेतग्रहणसामर्थ्यात्प्रत्ययोपदेशोनांनदित्यर्थजानान्माथितिकेत्यादौदोषश्चेत्त्र्णो
पिनास्त्रीतिसिद्धांतः॥ एवंचमनोरमादिमकलग्रंथनिर्वाहितधाख्यातनिस्त्रीदिरुक्तकथनेन
ततद्दूषणमनुचितमितिदिक॥ आङोनास्त्रियां॥ अचाउंनडितिनगीतिवासुवचं॥ पुंसीत्ये
वसिद्धेः मुनाकुलेनेतिनपुंसकेनगमसिद्ध्यर्थंक्रियमाणास्त्रियांग्रहणसामर्थ्यान्नित्य
स्यनासिद्धत्वं॥ अथवाप्रत्ययइत्यादिनिर्द्देशात्सूत्रत्रासिद्धमित्यस्यानित्यत्वेनात्राप्रवृत्त्या
नमुनेत्यस्यानावेपिरूपसिद्धिः॥ अत्रैवतात्पर्यग्राहकंपुंसीत्येवसिद्धेस्त्रियामितिकरणं
॥ एतेननुम्येवास्तुअमुष्मैकुलायेत्याद्यसिध्यापत्तेरितिमनोरमाग्रंथःनुम्यप्यस्तुइतिमु
पाद्यायांनाव:॥ तंत्रेणानानावेनकारश्चकार्येतिंप्रतिश्वनंप्रतिचकृतेचकार्यातिरंप्रति
मुत्नावीनासिद्धइतितदर्थः॥ नुम्यैवास्त्वितिपाठेएवकारोप्यर्थःउच्चारणार्थत्वादिति॥
तंत्रेणोच्चारितेद्वितीयेनेत्राहेत्यर्थः॥ इतिव्याख्यातृग्रंथस्यापास्तः॥ किंचयथाश्रुतेपितत
त्राद्याश्रयणमनुचितमेवनेत्यत्राकारस्योच्चारणार्थत्वेनसाक्षादन्यांतत्तानांवेनवानकारेक
त्वंव्येइतिमनोरमार्थः साधुः॥ नतुमवदुक्ततंत्रेणगौरवात॥ अच्चघेः॥ अच्चाद्ग्रहणंमा
स्तु॥ औतरुत्करिष्यते॥ तथाचटिलोपेसिद्धमश्वाविति॥ नचसखेयपत्यावितिटिलोपापत्ति
॥ पत्यावेश्वनिर्द्देशेनेतियद्दतिनिपातनेनटिलोपाभावसिद्धेः॥ नचविद्यातौतितिलोपाप

त्रिः गच्छतोपरदाराद्दिस्म इति निर्देशान्नतिलोपाभावसिद्धेः॥ नचस्वरे भेदः तिलोपे उदात्तनिवृ
त्तिस्वरेणएकादेशे एकादेश उदात्तेनोदात्त इति उभयथाप्युदात्तत्वात्॥ तथाचस्वरे रूपे वा
५७ विशेषाभावाद्ग्रहणं नाष्ये प्रत्याख्यातं॥ यत्तु नेत्संज्ञक इति मनोरमाप्रतीकमुपादायेयम
पि तदुक्तिश्चिंत्या तस्य लोप इति सूत्रभाष्ये उच्चारणार्थानामपीत्संज्ञकत्वस्य स्पष्टमुक्तत्वा
त् इत्युक्तं नवीनैः॥ तन्न॥ तादृशभाष्यानुपलंभात्॥ यदपि दीधीवेवीङ् इति प्रतीकमुपा
—यनित्यकालव्यापृत्य घत्वात्तस्येति भावः॥ नचतत्रोविदर्थस्येति प्रकरणेन समासबाध इवा
नेन तागोपि बाध इति वाच्यं॥ प्रतिपदविधानाषष्ठी न समस्यते इति वार्तिकानुरोधेन तत्रत
थाकल्पनेपीह तथाकल्पने मानाभावादिति तदपि न॥ संबुद्धौ शाकल्यस्येतावनार्षे इत्या
दिनिर्देशाल्लघुमानस्यात्राप्रसक्तत्वात्॥ अनङ् सौ॥ नकारोकारो नानुनासिकत्वेनेत्संज्ञान
फलाभावाच्च॥ एतेन नकारस्योच्चारणार्थ इत्संज्ञक इति केषांचिदुक्तिरपास्ता॥ अष्टक ए
कानुप्रत्ययः॥ इदं सूत्रं त्यक्तुं शक्यं॥ संज्ञापदे देशेषु ग्रहणेनैव सिद्धेः॥ हलुङ्याब्भ्यो ५८
दीर्घात्सुतिस्यपृक्तं हल्॥ ननु सुतिसीति प्रत्यये प्रकृते राक्षेपेऽतिखट्वः निष्कौशांबिरि
त्यादौ दीर्घग्रहणं विनापि सिद्धे लघ्वर्थमिति चेन्न॥ बहुश्रेयसीत्यादौ सुलोपापत्तेः
॥ तस्मान्ङ्याबाप्प्रत्याहारविवक्षावं तां प्रतीतो कृतिरिति व्याख्येयं॥ केवलेन तु व्यपदेशिवद्भा
वेन एवं च दीर्घग्रहणाभावे ऽतिखट्वः इत्यादावतिव्याप्तिरेव ननु बहुश्रेयसीत्यादावति

व्याप्तिः॥ यः सः कर्त्रीत्यादावतिव्याप्तिरव्याप्तिरपि न॥ त्यदादीनामः न ङ्याप्रातिपदिकत्वं यत्रापि
विवक्षितत्वाग्रयणात्॥ यः स इत्यत्र हलंतप्रकृतित्वाभावात्॥ यत्र हलंतस्य प्रकृतित्वेपि
नतः परत्वाभावात्॥ त्यदादीनाम इत्यादौ परसप्तमीत्वेपि न दोषः॥ एवं श्रविद्वान्सुजातः श्र
विष्ट इत्यादौ तद्धितलुकि स्त्रीप्रत्ययलुकि प्रत्ययलक्षणेनाबंतत्वादव्याप्तिः॥ ननु कृतेपि
दीर्घग्रहणेऽश्वस्त्री इदेवदत्तस्य इदेवदत्तेरित्यादि दोषस्तदवस्थ इति चेन्न सत्यं॥ ङीङ्याभ्या
श्चाविप्रश्लेषेण दोषात्॥ एवंच दीर्घग्रहणं सुत्यजं॥ एवंच हल्ङ्याब्भ्यः सुतिसि हल् इति सू
त्रमस्तु॥ मनोरमायां तु हलंतात्संयोगांतलोपेनेष्टं साधयित्वा उञापः सोरिति न्यासेन किंचि
द्बाधकमित्युक्तं तत्तुच्छं॥ हृत्र हाखागत इत्यादौ संयोगांतस्यासिद्धत्वात्सवर्णदीर्घानाप
त्तेः॥ तथादंयस्त्रीत्यादौ यणाम घवाधत्वमित्यादौ तु कृचनस्यात्॥ यत्तु नलोपात्संक्रमसं
योगांतलोप इत्येतस्मिन्नर्थे उञ्नस्य संबुद्धं तस्य चेति व्याख्याने नदि संबुद्ध्योरिति यत्तत्राप
कं तत्तु वीनैर्विचिक्ति संयोगांतलोपविषये ऽसिद्धत्वाभावस्तापनकारेति शेष इति व्याख्या
न दोष इत्युक्तं तन्न॥ तादृशाधाराज्ञापितेप्यनुपपत्त्यभावात्॥ यतत्तापनेऽनुपपत्ति
स्तदेव हितेन ज्ञाप्यं न तु यत्किंचिदपि॥ किंच उञापः सोरिति न्यासे सुपीरित्यादौ दीर्घानिस्या
त् संयोगांतलोपं बाधित्वा संयोगादिलोपे रेफोत्तत्वाभावेन वैरूप्यधाया इत्यस्याप्रवृत्तेः॥
यदपि परमनिष्कर्षे हल् उञापः सोरिति सूत्रमस्त्वित्युक्तं॥ तदपि न॥ अविनाराद्यमिसा

दौसंयोगांतलोपस्यासिद्धत्वाद्धलोपे इति दीर्घो न स्यात॥ तस्मान्निष्ठयोर्ग्रहणमपि कर्त्तव्यमेव
॥ उपलक्षणं तेन वीनो कृतत्वसमर्थनं तु नसम्यक॥ स्वतंत्रे त्वप्रयुक्ते निष्ठयोर्नु मन्त्रास्तेन मा
प्यादौ तत्संबंधेपिसायत्वेन्द्राष्टम्रयोगेः वाधकत्वाष्टम्रयोगायोगादिति न्यायेनासदादिप्रयो
५८ गे तदयोगात॥ प्रत्ययलोपे प्रत्ययलक्षणम इदं त्विष्टप्रकारतानिरूपत विशेष्यतानूणलि
प्रत्ययाश्रितेति विध्यर्थमिति वृत्तिकृन्मतम तेनानलोडित्यादिसिद्धिः॥ नाप्यकारास्कृतण
इइमित्यत्राचितेत्यनुवर्त्तन्ते णेडित्यादिसिद्धेपि सुदृषदित्यादौ दीर्घेडिवरिः॥ तदर्थय
त्नांतरमास्थेयमिति गौरवम॥ ममतु प्रतिभाति॥ अथ लोपे इत्येव सूत्रमस्तु॥ एवंसू
त्रे त्यस्य यस्ये त्यनुवर्त्तने स्थानिवदिति च तथा च प्रत्ययलोपे स्थानिवदेवेत्यर्थः॥ अस्था
निवत्यरं त द्विशेषधर्माश्रितपरं तेन सुदृषदि त्यत्र दीर्घस्वरयोर्व्यावृत्तिः॥ त्राह्णाधिकारमाश्रि
त्य स्थानिवत्यदस्यतादृशव्याख्यानेमानं तु लोप इति सूत्रकरणमेव॥ अन्यथा तस्य व्य ५८
र्थत्वापत्तेः॥ वस्तुतस्तु तदपि मास्तु सुदृषदित्यादिदीर्घः॥ अतु साहचर्येण श्रूयमाण
संतस्यैवं सोमेन मीध्वलीमो घमातिस्वशेषिम अत्रा हचर्येण पर्युदासेन वाश्रूयमाणासंत
स्येवेतिवक्तुं शक्यत्वात॥ नलुमतांगस्य अंगस्यांगमनोगं वा सर्वं प्रतिषिध्यते॥ तेन क
तीत्यादावांगोजसिद्धेति गुणो न अहरदयातीत्यादावनांगो रेफस्य सिध्यति॥ अत्रांगस्येति
सुत्यजं॥ पूर्वविधाविप्यनुवर्त्य लुमता लुप्ते तन्निमित्तकपूर्वस्य विधौ कर्त्तव्ये न स्थानिवदि

त्यर्थमतवात॥ एतेन लुमता प्रत्यये परतो यः पूर्वस्य प्रकृतिभूतो लध्वांगसंज्ञकस्तदुद्देश्यक
यत्कार्यमांगमनांगं वेत्यर्थः तेन पंचेत्यत्र पदसंज्ञा पनवति॥ राजपुरुषादौ नसंज्ञान॥ अंगसं
ज्ञानुयधोद्देश्यतावत्प्रत्ययसंज्ञाकालेऽसानातिदृष्टेव॥ तत्काले कार्यासंभवात्प्रवृत्तावपि प्रत्य
यलक्षणेन संस्पतिलध्वांगकार्यत्वाभावेन निषेधाप्रवृत्तेरिति भाष्ये दुष्टोखरौ क्रमेणास्ये
त्यंगीव्याख्यानं फलाभावादुपास्यं॥ अंगेत्यादिति पृत्येवेस्तेन तत्काले स्यादित्येतस्यावि
रुद्धत्वाच्च॥ विभुसरूपादृति॥ ननु साम त्या कमिति सूत्रे भाष्ये लिंगे युष्मदस्मदी लुक्ते
तत्र डे प्रथमयोरिति सूत्रे युष्मानित्यादौ तस्माच्छसो न इत्युपन्यासपरेण भाष्येण तथा स्व
मोर्नपुंसकादिति सूत्रे भाष्ये तुमादित्वि युष्मदाद्यादेशानां विप्रतिषेधपरेण वार्त्तिकेन
तद्भाष्येण च विरुद्धमिति चेन्न॥ लिंगसत्वेपि तद्बोधकप्रत्ययरहिते इति भाष्याभिप्रेत
त्वात॥ एवं च लस्त्रीत्यादौ टिलोपमादायैवदापवारणीयः॥ ननु लिंगाभावादितिदिक॥ त्रे
स्त्रयः॥ यत्तु त्रेरय इ कृतः श्रयइ यीत्यादावि वोच्चारणार्थत्ववारणायेति भाष्ये दुःशेषपरेतन्न
॥ निजां त्रयाणामितिनिर्देशेन यथा त्यासे सांत त्रांकायाइवासिमासेपि वारणसंभवात॥
तस्मान्निर्दिष्टान्तकरोतीति तिविक्विप्निदिति रूपं तत्रायडि रूपे विशेषस्याभावात
॥ त्रयीदेशः कृतः नन्वगोणत्वात्तत्राप्राप्तिरिति वाच्यं॥ त्रयकरणेनगोणेपि प्राप्तिसूची
कारात॥ तस्मात्प्रियत्रीणामित्यसाधुरेव यदि त्रिदित्यनभिधानं तदायडि सेवसुवच॥

यत्तु ङौ तु सवर्णदीर्घ इति॥ इदं तु संभावनामात्रेण एषां ङौ इष्टौ तौ च समसंख्यार्थ इति सूत्रेस्य
नाष्यप्रामाण्येनानभिधानादित्युक्तं त्राहेंकुत्रो खरे नवीनेस्तत्रं॥ यद्यपि पीवा तप्रमीत्यादी
नां समसंख्येकवचने सर्वैः स्वीकृतत्वेन तत्र स्वेच्छयानभिधानेमानाभावात्॥ ननु यद्यपि पी
५८ वा तप्रमीत्यादीनां सत्वे तत्रापि सरसीयदीति भाष्यानुपपत्तिर्मनमिति चेन्न॥ तस्य पूर्वप
क्षन्यायाख्यस्मिद्धांताभ्यवस्थापकत्वात्॥ भावा एवं पदस्य वृत्तिरिति सिद्धांतभाष्यादृष्ट्वा
नस्यैव न्याय्यत्वात्॥ यद्वा भाष्ये स्त्रीलिंगोदाहरणात् स्त्रीलिंग एव तत्सूत्रप्रवृत्तिस्वीकारेण
भाष्यानुपपत्त्यभावात्॥ यदि न चोरापहरणमोदरणीयमिति ब्रूषे तर्हि ऊकारेण साहचर्या
दिति॥ तस्य स्त्रियामेव संभवात्॥ क्विबंतेति॥ आचारक्विबंतात्कर्तरीत्यर्थः॥ अथ वा मा
हुमानेऽस्मात्॥ ननु मा ३ धातोः तस्मिन्नीत्वमवकारादावितिवचनादीत्वासंभवात्॥
न च तेस्मात् क्विपि वातप्रमाइत्यपि स्यादिति वाच्यं॥ वातप्रमीरित्युणादिसूत्रेण तस्मात् क्विब
भावज्ञापनात्॥ अन्यथा धातुनेदेन रूपद्वयसिद्धौ किं तेन॥ यद्यपि ज्ञाप्तिद्वेधा एष तावा
र्थवदिति सूत्रे तर्हि यञ्चनभिधानात्तस्मात् क्विप्॥ ईत्वमवकारादावितिवार्त्तिकस्यारव्या ५८
नपक्षे तु न कश्चिद्दोषः॥ न च पावानः त्रांस्ताहृत्यादी लापत्तिः॥ भाष्यप्रयोगानत्रवनिपू
र्विचोरेवप्रवृत्तिस्वीकारात्॥ एवं च दधातेः क्विपि धीरिति भाष्यं संगच्छते एवं तेन दधातेः क्वि
पि धीरिति भाष्यं एकदेशपुक्तिरितिं त्राहेंकुत्रो खरेनवीनोक्तिरपास्ता॥ हे बकुश्रेयसाति

॥ अत्र ह्रस्वे कृते ह्रस्वविधानसामर्थ्यान्न गुणो न॥ अन्यथा वार्थन घोगुणः ह्रस्वे व स्यात्॥ ए
वं च ह्रस्वस्य गुण इति गुणग्रहणं न कर्तव्यमिति लाघवं॥ यत्तु मक्रियालाघवार्थं वार्थनिं
ह्रस्वः॥ ह्रस्वनद्योर्गुण इत्येव वाच्यं ह्रस्वविधानसामर्थ्यात् समिचेत्यत्रैकदेशे स्वरितत्व
प्रतिज्ञया ह्रस्वपदस्यैवानुवृत्तिरिति भाष्ये स्पष्टं॥ अंबार्थानां गुणस्तु वक्ष्यमाणः॥ अ
नः क्लीबंतलेशे केमात् स्यंदनाद्योरपातिरभसाद्युक्तानः त्राहस्यांबार्थत्वेन गुणापत्तेः
ह्रस्वग्रहणेन तु ह्रस्वोपस्थित्या तांबार्थग्रहणान्न दोषः॥ तस्य नपुंसकत्वेपि हे वारे इति
वस्यक्षेगुणः स्यादेव॥ गुणश्रुत्ये कपदोपस्थितौ तत्वेनादावपिचरितार्थाकिरि त्युक्तं नवी
नैः त्राहेंकुत्रो खरेस्तत्र॥ अनित्यस्थले लक्ष्यैकचक्षुष्कतायाः॥ अवज्ञाकतेनात्रनत्रुमतो
गस्येत्यस्याप्रवृत्तौ बीजाभावेनानः त्राहस्य संबुद्धिपरत्वाभावात्॥ नदीसाहचर्येण स्त्री
लिंगस्यैवांबार्थस्य ग्रहणाद्वानः त्राहेगुणप्रवृत्तेः॥ अंबार्थनद्योः संनवव्यभिचाराभावेने
कपदस्यानुपस्थितत्वाद्वैस्यादावपि दोषाभावः यदि कश्चिदयं तोपि अंबार्थकः स्यात्तर्हि नदी
त्वादेव सिद्धेंबार्थग्रहणेन ग्रहणमनर्थकं स्यात् तस्मादोषाभावात् त्राघवार्थमेवेकिमा रव्या
नमेवयुक्तं॥ नन्वेतेषां गौरवापि दितिदिक्॥ आएनद्याः॥ अत्र इदमवन्नुमुचितः यत्कृताख्ये
तिप्रतीकमुपादाय नमाङ्योग इति सूत्रभाष्योक्तेः अ इति न्यासे तु वृद्धिरेवातिबाधां॥ अ
त्राटू तु वक्ष्यमाणः॥ अस्य पोह्रस॥ इति तत्र वृद्धिवारणाय अश्वेत्यत्र धाता विन्यपकर्ष

णवृद्ध्यनापत्तेः॥ वृद्धिरेचीत्यस्यानुपररूपंबाधकमितिबोध्यमित्युक्तंग्रंथेदुक्तोश्चैरेनवीनै
स्तत्र॥ आनर्थक्यप्रतिहतानांविपरीतंबलाबलमितिन्यायेनातोगुणइतिपररूपेःटकर
णव्यर्थतापत्त्यातत्सामर्थ्यात्पररूपंबाधित्वावृद्धिरेचीत्यस्यप्रवृत्तिसंभवात्॥ नचपरत्वा
४० दातुनुड्बाध्यतइतिनुड्बाधनार्थंतत्सार्थकमितिवाच्यं॥ तत्प्रयोजनत्वेकृस्वनप्राप्तो
नुडित्यत्रैवउर्नेर्नेवक्रियातयनुइहपरत्वादिति॥ सकृद्गतिन्यायाश्रयणादितिभावः
स्पष्टंचेदंकृस्वनप्रापइत्यत्रभाष्ये॥ यद्यपीहापवादोनद्याम्सर्वथानवकाशत्वात्॥ अ
पवादोनुत्पोधत्वस्येतिदीर्घकितइतिसूत्रभाष्येतुक्तत्वेनागमादेशयोरप्यतत्वसत्त्वात्
॥ तथाप्यनवकाशेनबाधेऽपवादप्रवृत्त्यनंतरमुत्सर्गप्रवृत्तेर्नदोषः॥ अतएवगणोरीत्व
मपवादत्वाद्वृद्ध्यादिशेषंनबाधते॥ किंतर्हिअनवकाशत्वादितिगुणोयङ्लुकोरितिसू
त्रभाष्येउक्तं॥ पादःपदितिसूत्रस्थेत्राष्टेतरप्राप्ताःनित्ययोराडामोःपरत्वादामितीता
प्यंतेकदेशपुक्तिरित्याकुर्नवीनाः शाष्टं० तन्न॥ निरवकाशेनोत्सर्गबाधेसमावेशोनस्या ४०
त्॥ उत्सर्गापवादयोः समावेशस्यक्वाप्यदृष्टत्वात्॥ तस्यचासुधुत्वेपादःपदितिसूत्र
स्थंविप्रतिषेधपरंभाष्यंमानं॥ तथाहि॥ इदमिहसंप्रधार्यंआट्याट्स्याट्ःक्रियंतां॥
आमितिकिमत्रकर्तव्यंपरत्वादाम्नित्याआट्याट्स्याट्कृतेप्याम्प्राप्नुवंति॥ अकृ
तेपिअनित्याःआट्याट्स्याट्ःकथमन्यस्यकृतेआमिप्राप्नुवंति॥ अन्यस्याकृतेप्रा

ह्नंतरस्यप्राप्नुवन्विधिरनित्योभवतिउभयोरनित्ययोःपरत्वादामिति॥ व्याख्यातंचकैयटेन॥ आ
ट्टादीनामवकाशाः खट्वायाः कुमार्याः सर्वस्या इति॥ आमोऽवकाशः कृतेष्वागादिषुवचनाद्यु
वधानेपिप्रवर्तनात्॥ यदितुप्रामेधडादिष्वादेशाश्चास्यसांतेइत्युच्यतेतनो॥ पवादत्वादामो
तेषांबाधःप्राप्नोतीत्यागमानादेशस्यचात्रसमावेशएष्टव्यइति॥ एरनेकाचोऽसंयोगपूर्व
स्य॥ अत्रानेकाचोऽसंयोगादित्येवास्तु॥ योशित्यनुवर्तते॥ तथाचाधात्ववयवसंयोगात्पू
र्वोयोयूतदंतोयोधातुस्तदंतांगस्ययणित्यर्थः॥ नचलुलुवतुरित्यादौयणापत्तिः॥ उवर्णां
तस्यचेत्तर्हिसुध्येवेति॥ ओःसुपीत्युत्तरस्वस्यनियमार्थत्वात्॥ नचसुपिचेत्तर्हिउवर्णां
तस्यैवेतिविपरीतनियमापत्तिःसुधीत्वाद्योऽविसुपियणनिषेधात्॥ अत्रधातुपदमाह
त्यानयविशेषणमितिकेचित्॥ प्रत्यासत्त्याधातोरेवयदेणामितितुन्याय्यम्॥ ॥इतिश्री
मन्मौनिकुलतिलकायमानगीर्वाणवर्द्धनभट्टात्मजरघुनाथभट्टसुतश्रीकृष्णभट्टविरचितायां
तर्कचंद्रिकायांअजंतपुल्लिंगसमाप्तिमगमत्॥ रमेति॥ ॥ अत्रेकादेशस्यपूर्वांतत्वेन
प्रातिपदिकत्वात्स्वाद्यइतिकेचित्॥ वाचाकोष्ठीत्यादौलिंगविशिष्टपरिभाषायाअव
रूपकत्वेनव्यापकत्वात्॥ क्रोष्ट्रीत्यादावमनुत्त्वेत्यादेरिवात्रापितस्याएवप्रवृत्तिर्युक्ता॥
फलेविशेषाभावात्॥ मनोरमायांप्रातिपदिकत्वात्स्वाद्यइत्युक्तंतद्यथं॥ यत्तुतत्रपरि
ष्कुर्वंति॥ तयापरिभाषयाप्रातिपदिकत्वनव्याप्यधर्माणांविशिष्टबोधनेनतयाप्रातिपदि

कत्वादित्यर्थः॥ ध्वनितं चेदं बहुव्रीहेरूधस इत्यत्र भाष्ये इति तन्न सम्यक्॥ तथाप्यधर्मिणि
मिति गुरुव्याख्याने फलाभावात्॥ परिभाषायां यथाकथंचित्प्रातिपदिकग्रहणात्॥ प्रमा
६७ णाभावात्॥ प्रातिपदिकत्वादित्यस्य व्यर्थत्वादनुक्षाराच्च॥ न चाबहुव्रीहेरिति सूत्रस्थं भा
ष्यं मानमिति वाच्यं॥ तत्रैव तस्यार्थस्यासंस्पर्शात्॥ तथाहि॥ ऊधसोनङ् लिंगाधिकारे॥ ऊ
धसोनङिति सूत्रं समासांतप्रकरणे कृत्वा बहुव्रीहेरूधसो ङीष् नश्चेति वक्तव्यं॥ तत्रालोन्त
स्येत्यंतस्य नकारो ङीष्प्रत्ययश्च स्त्रियां भवति नथोंनवति॥ ऊधसोनङिति समासांतेषु न
पठितव्यं॥ एवं च महोधाः पर्जन्यः कुंडोध्नी धेनुकमित्यत्र नङ् न भवतीत्यत्र वा कप् समासांतनि
वृत्त्यर्थं समासांतप्रकरणे एवोधसोनङ् स्त्रियामिति वक्तव्यमिति सिद्धांतितं॥ मध्ये च शि
ष्यबुद्धिवैशद्यार्थं च विचारितं॥ ङीषादिनापेति नष्ट तश्चेति वेत्युक्तयोरप्यसंभवः प्रतिपा
दितः॥ ङीषा बाधेन नद्यंतानां बहुव्रीहित्वाभावेन चेति॥ एवं च लिंगविशिष्टपरिभाषाया
अत्र संस्पर्शो नास्ति॥ किं च समासांतेपुमान प्रवर्तते॥ अन्यथा मद्राणां राज्ञी तत्रापि रा
जाहःसखिभ्यष्टजिति टचि पुंवद्भावे टिलोपे मद्रराज्ञीति स्यात्॥ एतेन नद्यृतश्चेति कृते त
दंतस्य बहुव्रीहित्वाभावाद्बहुव्रीहेरित्यर्थकवाक्यत्वाभावाच्च नद्यंत बहुव्रीहेः कबित्यर्थेऽपि क ६७
थं तत्स्यादिति चेन्न लिंगविशिष्टपरिभाषया तत्सामर्थ्ये केवलबहुव्रीहेर्लिंगप्रत्यय
विशिष्टाच्च बहुव्रीहेर्नद्यंतात्कबिति सूत्रार्थः स्यात्॥ समासांतविधौ लिंगविशिष्टग्रहणं

२५

नेति ज्ञापनात्सूत्रस्थं भाष्यं तु नद्यंतत्वपरतया व्याख्येयमिति भाव इति विवरणोक्तमपास्तं॥
करतो रुरित्यादौ कबापत्तेर्नद्यंतबहुव्रीहेः कबित्यर्थे विक्रमत्राकाः॥ एवं चाशंकासमाधा
नयोर्ग्रंथस्वारस्येन व्यक्तत्वं॥ मनोरमासमर्थनेऽप्याग्रहश्चेन्नदीत्यस्य समर्थ्येति॥ प्रातिपदिका
त्स्वादयो विहितास्तेषां वृत्तादपि भवंतीत्यर्थः॥ सर्वनाम्नः स्याड्ढ्रस्वश्च॥ अत्र सर्वनाम्नोऽस्य
ङित्स्वेव बहुवचनं॥ न चांतरतम्यादवङ् ह्रस्वस्य भाष्यरीत्या न स्याडोदात्तत्वे एकारेणोदात्ते
नेत्यनेन विनंक्षेरूदात्तत्वापत्तिरिति नव्योक्तियुक्तेः॥ चतसर्याद्युदात्तनिपातनवदेतानुदा
त्तएवपाठेन दोषात्॥ केचित्तु अश्वक्षीरेत्यनंतरं सर्वनाम्नश्चेयटः सुडिति पाठ्यं॥ ततश्चा
मि॥ ततस्त्वेत्यइत्यादि यथान्यासं॥ एवं च याटो ह्रस्वश्चेति मनोरमोत्प्रेक्षितत्वा सारपि मंदू
क्श्रुतेः सामर्थ्यस्य चानाश्रयणाल्लाघवं॥ अथवापि सर्वनाम्नः सुडित्यनंतरमत्र पाठः
योगश्चेति॥ वा न्यासः कार्यः एवं च महल्लाघवं॥ यत्तु एकारश्चाप्येति प्रतीकमुपादाय सर्व
नामत्वाहेनेत्यर्थः॥ न चैवमप्याबंतत्वाभावः॥ एकादेशेन निष्पन्नस्याद्यभावात्॥ अत
एव खट्वेत्यादौ परादिवद्भावेनाद्यमाश्रित्याबंतादिति सोऽपि उक्तः॥ परादिवद्भावेन
तत्वं तु न लभ्यं॥ उभयत आश्रयणे नांतादिवत्त्वाभावादिति वाच्यं॥ उभयत आश्रयणे
तद्भावस्याभावेऽप्येकदेशयुक्तत्वेऽपि सिद्धांतिसंमतत्वाभावात्॥ वत्ति ङे इङो धातोव
स्याम॥ परे तु लिंगविशिष्टपरिभाषया बंतस्य सर्वनामत्वं॥ आबंतत्वं तु परादिवद्भावेने

त्वाद्धुरिति शाब्देंदुशेखरे तथैवोक्तं॥ तन्न॥ मूलस्यासुगं॥ विषयत्वेन तत्राश्रयणाभावेनोभय
तत्राश्रयणेनोतादिवद्भाववृत्तांकायाः तत्प्रतिपादकभाष्यस्यैकदेश्युक्तित्वेन समाधानस्य च त्वम
६२ मूलत्वात्॥ यदि स्यादुगि विषयकं तदिति कुषेण तथापि भाष्यस्यैकदेश्युक्तिकथनमनुचि
तमेव॥ वस्तुतस्तु तत्रापि सर्वनाम्नः इत्यस्य सर्वनाम्नो विहितादापः ङि इत्यस्यार्थः इह
ति सूत्रार्थस्य भाष्यसंमतत्वेन दोषाभावात्॥ अंबार्थनद्योर्ह्रस्वः॥ अंबार्थं द्व्यक्षरं यदिति भा
ष्योक्तेर्नालौ वाउ इत्यादिद्व्यक्षराणां प्राप्तेरभाव एवासंबुद्धेति प्रतिपादितः॥ एवं च द्व्यजकवती
नां प्रतिषेधो वक्तव्य इति वार्त्तिकं न कर्त्तव्यं॥ ननु जगदंबेत्यादौ द्व्यक्षरत्वाभावाद्ध्रस्वो न स्यादि
ति चेन्न॥ तत्र समासेन द्व्यक्षत्वाभावेपि समासात् पूर्वमंबार्थस्य द्व्यक्षत्वस्य सत्वात्॥ एतेन द्व्य
क्षरं पदीत्यस्यांगत्वाद्व्यक्षरांबार्थकांतस्य ह्रस्व इति यमीशारीराक्रगदंबेत्यादौ ह्रस्वो न स्यादेवेति ६२
शाब्देंदुशेखरोक्तं न व्योक्रमपास्तम्॥ नहि संबुद्धाविति विहितविशेषणं किंतु परविशेषणं
॥ तथा च जगदंबेत्यत्रांबेत्यस्य द्व्यक्षरत्वेन ह्रस्वसंभवे तादृशोक्तेः शास्त्रस्यसमर्थत्वात्॥ यद्यपि जर
सादेशस्येति॥ याडामविषये पूर्वविप्रतिषेधेनान्यत्र परविप्रतिषेधेन जरसि कृते इत्यर्थः॥
नन्वेवमेतत् श्री नुट्याडामां नित्यत्वादेषु कृतेषु अजादित्वाभावान्नसंनिपातपरिभाषया च ज
रसादेशस्याप्राप्तिरिति वाच्यं॥ शब्दांतरप्राप्त्या नुट्विधिरनित्य इत्येत्वादीनामप्यनित्यत्वा
त्॥ आकारांतरप्रस्त्रिष्य अस्पेवापोग्रहणं नत्वातिदेशिकस्येति व्याख्यानात् एवं न संनिपा

तस्यापि दोषाभावः॥ एतेनऽ यद्यपि जरसादेशस्येति प्रतीकमुपादायैवं चेत् त्वच्छ्री नुट्या
डामां नित्यत्वात्सर्वमेषु कृतेषु क्वचिदजादित्वाभावात्क्वचित्संनिपातपरिभाषया जरसो
ऽप्राप्तिरिति भावः॥ यद्यपि याडामोः जरसपेक्षया परत्वात्तयोः कृतयोरादेशऽजादि विघात
कत्वे संनिपातपरिभाषया न जरसः प्राप्तिरेवमत्वेपि तथापि तत्र प्रश्लेषफलं दर्शयितुमाह
॥ एवमितीति॥ शाब्देंदुशेखरेन व्योक्रमपास्तं॥ पक्षे जरस इत्यादिनाम सिद्धिप्रसंगात्॥
न चोक्तिसंभवानाकादिष्वापत्तिः॥ मदुक्तरीत्यानित्यत्वाभावेन। विप्रतिषेधसंभवे परश
ब्दस्येष्टवाचित्वात्क्वचित् पूर्वविप्रतिषेधेन क्वचित् परविप्रतिषेधेनोक्तिसंभवसद्भावात्॥ इष्ट
त्वं च सकलग्रंथकारसंमतत्वादवसीयते॥ अन्यथा परशब्दस्येष्टवाचित्वमादाय क्वापि पूर्ववि
प्रतिषेधो न स्यात् यदपि च तत्र यत्रोदाहरणे सूत्रभाष्यवार्त्तिकानां फलभेदः॥ आपततितेषा
मतनिधानं॥ यथा॥ अतिखट्वस्य अतिखट्वाः इत्यादि रितिनआप्स्थानिकोदीर्घनित्यादेशो
न स्थानिवदित्यर्थकेन अप्रत्ययहणेदीर्घ इत्यनेन ह्रस्वे स्थानिवद्भावनिषेधेनाप्त्वाभावेन दी
र्घेतिस्थानिके सुतरामाप्त्वाभावात् लुग्लोपाप्रवृत्त्यातिखट्वः इति रूपसिद्धावनभिधानस्यव्य
र्थत्वात्॥ एवं मतिखट्वायेत्यत्र याडोप्यनापत्तिः॥ अत्र कौमुदी तु चिंत्यैव॥ आप्स्थानिस्या
प्त्वाभावात्॥ ङितिह्रस्वश्च॥ अत्र पूर्वसूत्रमनुवर्तते॥ तो ह्रस्वो दीर्घोऽचित्तु नयमपि भाष्यमि
ष्टानितं पूर्वव्याख्याविति सूत्रे॥ तच्चतत्रैव वक्ष्यामः॥ तत्र ह्रस्वपक्षे सामानाधिकरण्येनान्व

पः॥ दीर्घपक्षेतु वैयधिकरण्येन व्रीह्योः स्यादिति विभक्तिविपरिणामेनेति विवेकः॥ अ
त्र गौचित्र्यभ्रवग्वेति सुवचं॥ एवंच वामीति सूत्रं ङिति ग्रहणं च न कर्त्तव्यमिति लाघवम्॥
६३ ॥ नचैवं श्रीणामित्यादौ संनिपातपरिभाषया नुट् न स्यादिति वाच्यं॥ तस्या अनित्यत्वात्
॥ यद्वा सामर्थ्यनिरूपितानीत्यस्य विशेषणत्वाद्यस्मिन् विधिस्तदादावल्ग्रहणे इति प
रिभाषया विशेष्यप्रत्ययपरत्वस्याविघातात्संनिपातपरिभाषाया अप्रवृत्तिः॥ यद्वा वा
मो रुस्याश्चेति न्यासः॥ एवचनकोपि न दोषः॥ यत्तु अजहत्स्वार्थपक्षे त्विति मूलप्रती
कमुपादाय तु नीलार्थेः रुचिर्ध्वनिता॥ तद्बीजं तु रूढेरविरोधित्वे जहत्स्वार्थवृत्तेरभावः
॥ किंच जहत्स्वार्थाजहत्स्वार्थवृत्त्योरवयवानां वाचकत्वे स्वार्थत्यागतदभावाविसंवा
दः॥ तत्रांत्ये स्वार्थस्य पुमादिवृत्तेः कथमन्यपदार्थे स्त्रियां वृत्तिः नचान्यपदार्थस्य समु
दायशक्यत्वेपि समुदायघटकत्वेनावयवस्यापि शक्यतः इत्याशयः तद्धि जहत्स्वार्थत्वे
पि तुल्यं॥ तत्रापि पक्षेन्यपदार्थस्य समुदायशक्यत्वात्॥ यदि वाचकपमाश्रित्याधिकरण
त्वविवक्षेत्युच्यते तेन राजहत्स्वार्थत्वपक्षेपि तुल्यमिति शाब्दतत्त्वेन यदुक्तं तच्चेदंव ६३
क्तव्यं॥ हेतं त्वार्थवृत्तत्वेव यत्र रूढिविरोधिनीति वचनमूलकोहि नव्यैरस्वरसेउक्तः
॥ सचसमुन्नेयवचनाभावेन निर्मूलत्वान्नस्पृश्यः व्याप्यव्यापकत्वाभावेन बाधितः॥ अ
स्तु वा तार्किकादिसकलसंमतत्वाद्वयंतरादावयवार्थबोधाभावाद्युतद्वचनं प्रमाणं॥

२१

तथापि कुशलादिपदेष्विव रूढिलक्षणा वृत्तिविषमकं तत्र तु शाब्दिकपरिभाषितकृत्त
द्धितसमासैकशेषसनाद्यंतधातुरूपवृत्तिविषयकं येन मदुक्तोः स्वरसः संगच्छेत॥ व
स्तुतस्तु मंडपक्षकणाभिगंधादिपदेष्विव रथंतरकुशलादिपदेष्वपि योगिकशक्यप
दत्वमेवयुक्तं॥ एवंच तार्किकादिनिमंडपपदस्य योगिकशक्यपदत्वमेव युक्तं॥ एवं
च तार्किकादिनिमंडपपदस्य योगिकशक्यपदत्वं कुशलपदस्य लाक्षणिकत्वमुक्तं तद
नयोर्वैलक्षण्याभावादयुक्तमिति विवेचितं शब्दार्थतर्कामृते स्माभिः॥ किंच जहत्स्वा
र्थस्यत्र कीदृशवचनव्यक्तिं कृत्वनास्वरसः सूच्यते॥ किं यथाश्रुतैवकारमाश्रित्य जहत्स्वा
र्थायां नियमः॥ उतैवकारस्यभिन्नक्रमत्वमाश्रित्याविरोधिनियमः॥ नाद्यः॥ समर्थः पद
विधिरिति सूत्रस्थराजपुरुषइत्यादौ विरोधिरूढ्यभावेपि जहत्स्वार्थाप्रतिपादकत्वाप्यवि
रोधात् न द्वितीयः॥ जहत्स्वार्थायानियमाभावेन तद्बीजन्तु रूढेरविरोधिजहत्स्वार्थवृत्तेर
भावः इति नवद्युक्तार्थासंगतेः॥ किंच वेदंति निर्जहत्स्वार्थागंगासंबंधितीरघोष इति बो
धेतु अजहत्स्वार्था॥ काकेभ्यो दधिरक्ष्यतामित्यादावजहत्स्वार्था॥ सोयंदेवदत्तः तत्वम
सीत्यादौ जहदजहत्स्वार्थेति विवेचितं॥ नवद्दीसाजहदजहत्स्वार्थयोः समुच्चयाभावाद्विरु
ध्येत॥ शाब्दिकमते पि रथंतरादौ जहत्स्वार्थाराजपुरुषइत्यादावजहत्स्वार्थाप्राक्षीदकं
इत्यादौजहदजहत्स्वार्थेति यथासंभवंबोध्यं॥ तार्किकास्तु जहत्स्वार्थपदेनैव निर्वाहेनज

इदजहदजहत्स्वार्थानिचाजहत्स्वार्थत्वसंभवेन विनिगमनाविरहः॥ नञः प्रतियोगितावच्छे
दकावच्छिन्नाभावबोधकत्वेन तदसंभवादित्याहुः॥ अत्रेदं वक्तव्यं॥ किंच जहत्स्वार्थाहन्निरे
४४ वनेति ब्रूषे उत तत्त्वेपि जहत्स्वार्थपदेनैव निर्वाह इति॥ नाद्यः॥ तत्त्वमस्यादौ सकल
संमतानुभवस्यापलपितुमशक्यत्वात्॥ बोधानुरोधेन जहत्स्वार्थयोरिव तस्याप्यावश्य
कत्वाच्च॥ नांत्यः जहत्स्वार्थपदेनाजयवतीत्यस्य बोधयितुमशक्यत्वात्॥ अन्यथा पदं च
तुर्विधमित्यपिनुच्छिद्येत॥ तत्रापि तुल्यपुन्नागादिपदेन यौगिकपदेन वा निर्वाहसंभवा
त्॥ तस्मान्नाकिंचित्कं तत्खंडनमनुचितमितिदिक्॥ यदापि किंचेत्यादितुल्यमित्यंतं त
दपि न॥ रथंत्रादौ केनापि रूपेणान्वयाभावे जहत्स्वार्थत्वं प्रकारत्वेनान्यान्वयित्वे ऽजहत्स्वा
र्थत्वमिति भेदसत्वेन तुल्यत्वाभावादितिदिक्॥ मनोरमायामनित्यत्वादिति प्रतीकमुपा
दाये कौचीत्यादिनाकं रेस्पष्टमित्यंतेन नलुमतेत्यस्यानित्यत्वमुक्तं तदिकौचीति सूत्रस्थ ४४
भाष्यस्याभिन्नाभिप्रायत्वादसंगतं॥ तथाहि॥ अत्रयहणं किमर्थं अत्र पुत्रामित्यादौ मा भूद
त्सुनलोपो न विप्रतिषेध चत्रपुमामित्यादाविगंतकालकपालेति नुमीगंतत्वाभावात्स्वरक
र्थं॥ कृतेप्यनर्थकरणोपंचत्रपुणेत्यादाविवसंघातमक्रमस्य नुमो ऽवयवस्येगंतत्वाव्याघात
त्॥ अतिरासि प्रियतिसृ इत्यादावात्वतिस्रादेशौ परत्वाद्भवतः॥ न च वृद्धौत्वेति पूर्ववि
प्रतिषेधः शंक्यः॥ तत्र वृद्धिग्रहणे विहितायाएव ग्रहणात्॥ त्रपूणामित्यादौ नुमितामि

ति दीर्घाभावेपि नोपधायाः इति णत्वसिद्धिः॥ अचीनामित्यादौ लक्षणप्रतिपदोक्तपरिभाषयेनहस्र
षेत्यस्याप्रवृत्तिः॥ बक्रूत्तिः कुंडलेत्यादौ षड्भिः पितृजुषोत्तममित्यनेन स्वरसिद्धिः॥ एवमत्र प्रयो
जनाभावेपि पुत्रशरार्थत्वं नहि स्वरितत्वाकरणे न लाघवात्तत्रैवायं कुर्यात्त्रिपुइत्यादौ संबुद्धिर्व्याप्ट
त्तिरपि न प्रयोजनं नलुमतेति निषेधनविनक्तिपरत्वाभावात्॥ एवं तर्हि सिद्धे सति यद्ग्रहणं
करोति तज्ज्ञापयत्याचार्यो निवर्तीह कश्चिदन्योपि प्रकारः प्रत्ययलक्षणं नामेति किमेतस्य ज्ञा
पने प्रयोजनं हे त्रपुहे त्रपो अत्र गुणः सिद्धो भवतीति॥ एवं तर्हि सिद्धमित्यंतं भाष्यैः सर्वैः नलु
मतेत्यस्यानित्यत्वपरतया व्याख्यातं तन्नु न चमत्कारावहं एवं स्यादिष्टप्रतिपत्त्यै तज्ज्ञापयत्या
चार्यो नलुमतेत्यस्यानित्यत्वमित्येव वदेत्॥ किंचैकस्मिन्नक्षे महत्तिरप्रवृत्तिर्विकल्पफलिका
ऽनित्यत्वेन दृष्टा॥ मम त्वत्र प्रतिभाति॥ अन्योपि प्रकारः प्रत्ययलक्षणं नामेति सूत्राभिसं
धिना प्रत्ययलोपे प्रत्ययलक्षणं वेति न्यासः सूचितः॥ सा च व्यवस्थितविभाषा तथा च हे त्रपु हे त्र
पो इत्यत्र विकल्पः सिद्धः॥ क्वचिन्नित्यं क्वचिदभाव इति सर्वेष्टसिद्धिः॥ एवं च नलुमतांगस्येति
सूत्रं न कर्तव्यमिति लाघवम्॥ न च व्यवस्थितविभाषायां लक्ष्यानुरोधाश्रयणे न गौरवमिति
वाच्यं॥ अनित्यत्वाश्रयणेपि तुल्यत्वात्॥ यद्वा प्रत्ययलक्षणानित्यत्वमेव ज्ञाप्यते॥ एवं च प्रत्य
यलक्षणाप्रवृत्तौ त्रपु इति सिद्धिः॥ तत्प्रवृत्तौ तु नुमि त्रपुनु इति स्यात्॥ अत एव भाष्ये रूपद्वय
स्युपात्तं॥ गुणसिद्ध्यर्थमिजग्रहणस्य साफल्यात्॥ इति नलुमतेति सूत्रानुवादिनापि एवमेव

फलं वाच्यं॥ वस्तुतस्तु नपुंसकस्य झलच इति सूत्रादनित्यत्वमपि नक्विपरिणामेनान्वये
न तस्मामध्याहरिवानित्यत्वसिद्धो व्यर्थं तत्॥ इग्यन्ताः स्त्रीलिंगाः अनोम्॥ अत्रामिति छेदः नतु
म इति॥ एऊ ऋत्वादिति सूत्रे भाष्ये तथैवोक्तत्वात् लाघवाभावाच्च॥ यत्तु वस्तुतस्तु म इत्येव
५५ पदच्छेदः॥ लाघवात् अपिचेति दीर्घविरहणं तु सन्निपातपरिभाषयेत्युक्तं मनोरमायां तद्व्याख्या
तं निर्मूलं देवानुसृतं॥ न त्वयथा सन्निवेशात् लाघवस्यार्थलाघवस्य वाभावात्॥ ह्रस्वाकारस
न्निपातेन जातस्य तद्विघातकत्वायोगादिति दीर्घविरहणं त्वयुक्तमेव तकार उच्चारणार्थ इति
प्रतीकमुपादाय ननु तपरसूत्रप्रवृत्त्यर्थ इत्यर्थः॥ नपुंसके ह्रस्वाव्रूपेण वा ह्यात्वात्वप्रसि
द्धेरिति भाव इति तत्र रंग्रंथे न विरोधात्॥ यदिन्नाद्लाघवेच्याग्रहश्चेत्तर्हि अन्म इति सूत्रम
स्तु दीर्घविरहणं तु संज्ञापूर्वको विधिरनित्य परिभाषयाङ्ग कार्य इति परिभाषया वा मतइ
त्यस्मास्तु अयुक्त एव विधेयस्य पूर्वनिपातात्॥ अस्त्रासोः त्रिः॥ ननु निरवंधकपरिभाष
या कुंउङ्गोददानीत्यादौ तद्धितस्यैव त्रासोग्रहणं स्यादिति चेन्न॥ तदपेक्षया साहचर्यपरिभा ५५
षायाः लोकन्यायसिद्धत्वेन बलवत्त्वात् तयेव व्यवस्थोपपत्तेः॥ अन्ये तु ये नानुबंधेन सानुबंधस्य
तदनुच्चारणएव तत्र प्रवृत्तेरिति वदंति॥ इको चिविभक्तौ॥ अत्र सुपीको चीति सुवचम्॥ सु
बूव्यतिरिक्तविभक्तिसंज्ञकं प्रयोजनाभावात्॥ पूर्वेकिमर्थमुक्तं रीत्या तु न तुमतेत्यस्याभावे
तदनित्यत्वज्ञापनार्थमचीत्यपि मास्तु॥ सुपीक इत्येवम् सूत्रमिति निष्कर्षः॥ भाष्ये ध्वनि

२९

तमिति भाष्ये हीग्यहणं किमर्थमित्याशंक्या संध्यक्षरनिवृत्त्यर्थमित्युक्तं कः किंत्वेनाका
रनिवृत्त्यर्थत्वं निराकृतं॥ न च तदेव निर्वहति॥ यदिमन्निपातपरिभाषया सामगाय इत्यादा
वातो धातोरिति लोपाभावः॥ अन्यथा टकः किंत्वे आतो लोप इटि चेत्यादौ लोपेऽयाकारांत धातु
त्वाभावादातो धातोरित्यस्याप्रवृत्त्या सामगाय इति रूपं॥ अकित्वे तु आकारस्य गुणे परस्य रूपे
तदिव ज्ञावेन विशिष्टधातुत्वे आतो धातोरिति लोपे सामग इति रूपं एवं फलभेद तापक
त्वासंभवः॥ सन्निपातपरिभाषाश्रयणे तु तापकत्वं संगच्छत इति दिक्॥ स्वमोर्नपुंसकात्
॥ अयं लुग्गंतरंगानपि विधीन्विहिरंगोलुग्बाधत इति न्याये तत्त्वदादत्वस्य बाधकः॥ एवं चा
नयोस्तु लुग्बलत्वाभावेन॥ लुगत्वयोर्विप्रतिषेध प्रतिपादकोमनोरमा ग्रंथोऽयुक्तः॥ एवं
च परसप्तमीपक्षेप्ययुक्तत्वे विषयसप्तमीपक्षे सुतरामयुक्तत्वं बोध्यं॥ न च विषयसप्तमी
पक्षे पूर्वमित्त्वे अतोमिति सोरमादेशे तं कुलमिति स्यादिति वाच्यं॥ न च लुका विषयापह
रेणात्वाप्रवृत्तेः॥ यत्तु तं कुलमिति॥ द्वितीयैकवचने इति शेषः प्रथमैकवचने तु सं कु
लमिति स्यादिति बोध्यमिति शब्दरत्ने॥ तन्न॥ पूर्वं सोरमादेशे एकादेशे चोत्पत्त आश्रयेत
दिवद्भावविरहात् स्थानिवद्भावेन सुत्वाभावात् लत्वस्याप्रवृत्तेः॥ इत्यभिप्रायेण
णैवमनोरमायां तं कुलमिति स्यादित्युक्तं इत्याऊरिति॥ अत्राऊरित्यनेनात्रास्वरसः सूचि
तः स चेयसश्चेति सूत्रस्थभाष्यविरोधः॥ तथाहि॥ इयस उपासकनिस्तोप्रत्ययस्य दीर्घत्वं

वक्तव्यमित्यस्यप्रत्यासत्त्योपस्थितेन ह्रस्वविषयकस्यपुंवद्वचनात्सिद्धमित्यनेनन पुंसकोप
स्थितेन ह्रस्वविषयकेनबाधः॥ यदि पुंवदित्यनावादिदेशफलितार्थकथनेनेयसोर्वक्तुर्नारे
नेत्यनेननपुंसकह्रस्वत्वनिषेधोन स्यात्तर्हिनाप्यविरोधः स्पष्टएव॥ यद्दिदीर्घत्वमपिसामा
९८ न्यविषयकमितिब्रुषेतर्हिप्रकृतग्रंथासंगतिस्तदवस्थैवाप्रत्याख्यानासंगतिस्त्वाव्यापके
नहिव्याप्यस्यप्रत्याख्यानंयुक्तमितिदिक्॥ पूर्वविप्रतिषेधेनेति॥ ननुनुमोनित्यत्वान्नत्व
भावस्यतुनुमिकृतेनिर्दिश्यमानस्येतिपरिभाषयानुमोव्यवधानादनित्यत्वात्तुल्यबल
त्वाभावेकथंपूर्वविप्रतिषेधः नचसूत्रेषष्ठ्यंतोच्चारणाभावेननिर्दिश्यमानेत्यस्याप्रवृत्त्या
तत्वभावस्यानित्यत्वमितिवाच्यं॥ शास्त्रार्थस्थानिवत्त्वमादायपरिभाषाप्रवृत्तिस्वीकारात
॥अन्यथापरमक्रोष्टुशब्देविशिष्टस्यतत्वभावापत्तेरितिचेन्न॥ शास्त्रांतरप्राप्तस्यानुमोप्यनि ९९
त्यत्वात॥विनष्टाविस्यस्यागविशेषणत्वेनतत्वभावस्यापिनित्यत्वाच्च॥ एतेनांगाधिकारे
तदंतविधिःसत्वेनतदंतग्रहणेनपदागमाइतिन्यायेननुम्विशिष्टस्यग्रहणेपिसत्रेषष्ठी
निर्देशाभावान्निर्दिश्यमानस्यनुमाव्यवधानमित्यस्याभावेपिस्पष्टएवविप्रतिषेधसामर्थ्यान्नि
कृतइतिन्यायेनपुनस्तत्वत्वाभावइतिशाब्दरत्नोक्तमपास्तं॥ पुंवद्भावोत्तवतीस्याकुरिति॥
इत्याकुरित्यनेनमाधवान्निरिक्तमंतस्वरमःसूचितः॥ सचोपजीव्यविरोधात्तुवद्भावप्रवृत्तेः
इत्यनंतान पुंसकलिंगाः॥॥ोदरः॥ ननुधुगित्यादौघत्वस्यासिद्धत्वाद्धुत्वंस्यात॥ नचघत्व

विधानंव्यर्थंतुल्यार्थत्वापत्तेरितिचेन्न॥ वाद्रुहेतिघत्वविधानविकल्पेनघत्वस्यापवादत्वेनतु
ल्यार्थत्वाभावात॥ तुल्यार्थास्तुविकल्पेरन्निितिन्यायेनवाविकल्पाभावेसिद्धेघत्वविधानसा
मर्थ्यादसिद्धत्वाभावसिद्धेरितिभाष्यकैयटयोःस्पष्टं॥ घकारांतरंतुदादेरितिसूत्रेवक्ष्यते॥
यत्तुएकेद्वितीयमिति॥ अन्त्यस्यवान्निकिकाराइत्यर्थः॥ अपदांतनाजमिति॥ इदमन्त्यत्वेना
जामित्यथोपलक्षकं॥ पदांतेप्रायोजश्त्वप्राप्त्याचर्त्वविनाचयोरलाभात्तु॥ तथाचेतिवदता
मूलकृतास्यार्थस्यसूचनात॥ अतएवसुगणदृषद्इत्यादौनवत्वेवकुगादीनांजश्त्वंप्रस
सिद्धत्वेनतदग्राह्याच्चत्वस्याप्यभावादितिभावरत्नेशाब्दरत्नेनयेरुक्तंतन्न॥ स्वायत्तेशब्द
प्रयोगेकिमित्यवाचकंप्रयुज्महेइतिन्यायेननिर्वीजलक्षणायागौरवात॥ पक्षेपिवक्ष्य
णप्रवृत्त्याचर्त्वनाश्काच॥ तस्मादित्थंव्याख्येयं॥ एकेकरसाद्यतिरिक्ताः॥ अपदांतनाजं
द्वितीयमाहुः॥ तन्मतेदुगादीनांपदांतत्वान्नद्वितीयः॥ पोक्तरसामतेतुपदांतापदांतसाधा
रणत्वाद्वितीयोनवत्येव॥ अतएवैकइत्यनेनतत्रास्वरसःसूचितः॥ तथाचेतिमूलेसंम
तिस्तुचयांशारिद्वितीयत्वेएव॥ नत्वपदांतत्वे॥ दादेर्धातोर्घः॥ धातोरित्यावर्त्ततइतिप्राचः॥
दादेरित्यावर्त्ततेइतितुनत्याख्यं॥ प्रथमातिक्रमेकारणाभावात॥ तत्रदादिग्रहणस्योपदेश
लक्षलेःव्याख्यतिव्याप्तिपरिहारःधातोरित्यस्यतथात्वेहिव्याप्तिपरिहारेपिच्याप्तिप
रिहारोनस्यात॥ नवेरपितथास्वीकाराच्च॥ वस्तुतस्तुउपदेशाकाजंलक्षयतीत्याख्या

नेरादेरितिसूत्रेनाष्यानुक्तत्वान्निर्मूलं प्रत्युतत इननिमतंच नथाहि द्वाग्धेत्यत्र घत्वस्यासिद्
त्वात् ढत्वंप्राप्नोतीत्याशंका होढः दादेः ततोधातोर्घः दादेरिनितवर्त्तते नेतिनिवर्त्तं ॥ एवमपि
घो दादेरित्युच्यते तत्रेदंनसिध्यति ॥ अधोक् ॥ कृतहिस्यात् मास्मधोक् नैषदोषः ॥ धातोरिति
४७ नैषदादिसमानाधिकरणाषष्ठी दादेर्धातोरिति ॥ कोतर्हि ॥ अवयवयोगेयाषष्ठी धातोर्यदा
दिरवयव इति ॥ साचावश्यमवयवयोगाषष्ठी विज्ञेयाउत्तरथाहि कार्यो बहुव्रीहिप्रपूर्वस्य तस्य
स्योरितिरूहापियथास्यात् ॥ गदिनयतेरप्रत्ययग इविति ॥ यद्यवयवयोगाषष्ठी दोग्धेत्य
त्रनप्राप्नोति एषोपिव्यपदेशिवद्भावेन धातोरवयवोभवतीति ॥ यदिति व्याख्यानंसमतंस्या
त्तर्हि तिनैवाधोगित्यादिसिद्धावाशंकासमानमसंगतंस्यादिति ॥ ननुनाष्येघत्वस्यासिद्
त्वाहत्वमाशंकांकारूधासमाहितं ॥ अयवादोवचनप्रामाण्यादिति होढोदादेरितिवा ॥ त
त्राद्येव्याप्स्यतिव्याप्तिशंकानकृता ॥ द्वितीयेतुअव्याप्तिमाशंकानैषासमानाधिकरणा
षष्ठीत्यनेनसमाहितं ॥ एवंचाद्ये ऽव्याप्स्यतिव्यानाद्वितीयेतुऽतिव्याप्तिस्तदवस्थाइत्युप
देशिष्वलक्षकत्वमावेशांकमितिनाष्यानिमेतमितिवेत्तव्यधिकरणाषष्ठी तेनैवसर्वसा ४८
मंजस्यात् ॥ तथाहिधातोरवयवोयोदादिस्तस्यहकारस्त्सघकारइतिसूत्रार्थः ॥
दामालिडित्यादौधातोरवयवोयोदादिरमिइतिनतदीयोहकारइतिनातिव्याप्तिः ॥ एव
मधोगित्यादावडागमेऽप्यधोगितिधातुस्तदवयवोधोगितितदीयोहकारइतिनाव्याप्ति

३१

रितिनाष्यान्नायोममप्रतिभाति ॥ नवीनास्तुअतएवनाष्येघत्वस्यासिद्धत्वाधोगित्यादौढत्वं
प्राप्नोतीत्याशंक्यापवादत्वेनसमाधायाग्रेवेवंवक्ष्यामि ॥ होढः ॥ अदादेरिति ॥ ततोधातो
रिति दादेरितिवर्त्तते नेतिनिवर्त्तमित्युक्तं द्रुहेस्नुवाद्रुहेत्यनेनढत्वस्यापिविधानाध्रुडित्या
दौनदोषः ॥ इतितदाशयः ॥ तत्रधातोरितिसूत्रेनाष्यकृतोदादेरित्यनुवृत्तेः फलांतराभा
वेनतदुपदेशावद्दादिलक्षकंसामर्थ्यात् ॥ अथाधिकारानुरोधाच्चद्दवचनिषेधसमर्पक
त्वेवम् ॥ अतएवनामधातुविषयेदामलिडित्यादौढत्वघत्वानोवोसिद्धौएवंचतदेकवाक्य
तयाप्यवादत्वपक्षेपिदादिषस्योपदेशकालिकदादिलक्षकतोचिता ॥ अन्यत्वाश्रयणंतु
बालानांतत्प्रतिपत्तयेइतिबोध्यं ॥ नचोपदेशाऽद्येवकुतोनोक्तंगौरवापत्तेः ॥ धातोरिति
तुतद्धाडित्यादिव्यावृत्त्यर्थं ॥ उत्तरत्रावत्रपकं ॥ अव्याप्तीति ॥ अधोगित्यादौतुसाननुधातो
रवयवोयोदादिरित्यर्थेइदंसिद्धं ॥ वैयधिकरण्यंचगर्दभयतेरप्रत्ययगधविस्यादोनष्ट
त्वावायोत्तरसूत्रेऽप्यावनूपकं ॥ दोग्धेति ॥ व्यपदेशिवद्भावात्सिद्धं ॥ स्पष्टंचेदंनाष्ये ॥ तथाह
॥ अतिव्याप्तीति ॥ दामलिडित्यादौतुसा ॥ नचप्रोक्तकनाष्योत्तरमधोक्सिद्धयेवैयधिकर
ण्यान्वयपर्यंतंनाष्यकृतोधावनंव्यर्थमिति ॥ दादेरितिवर्त्ततइत्यस्योक्तमाशयमजानतः
एवमपिघोदादेरित्युच्यतेतत्राधोगसिध्यतीतिशंकायामुत्तरसूत्रार्थमपिप्रसंगात्त्रिणि
तुदादिपदलक्षणमधोगित्यस्यासाधारणफलत्वानावदत्राणितुचतथोक्तं ॥ अतएवाग्रे

वैयधिकरण्यप्रसंगोत्तरार्थमावश्यकत्वोक्तेर्हार्थमनावश्यकत्वं भाष्ये ध्वनितं संगच्छते इत्य
लमित्याकृ ॥ अत्र मत्कृत भाष्ययोजने तु प्रथमपक्षेपि अव्याप्तिनिवारणं तच्योक्तौ तत्रा
४८ स्तिकिंच ज्ञानत इतिउत्तरार्थमेव वैयधिकरण्यमिति केचिन्नो नास्ति तथानोक्तौ तु सोऽस्ती
ति सुहृदये विवेकव्यमिति दिक् ॥ वाक्तुल्युहेति ॥ अत्र वाक्तुहाहीनामिनेव वक्तुं युक्तं ॥
गणनिर्दिष्टत्वात् ह्रस्तुकिं न स्यादिति वाच्यं ॥ तस्य छान्दसत्वात् ॥ लक्ष्यानुरोधात् क्विचित्तना
षाविषयत्वेपि म्रितघात्राघातुवंधेनेति निषेधस्यानित्यत्वेनेष्टस्य सिद्धत्वात् ॥ अनित्यत्वे च
गुणोयदुक्तेरिति ज्ञापकं बोध्यं ॥ तेन अघाद्वित्यादौ न घ्नाव सिद्धिः ॥ यत्तु तस्याः भाष्यानुक्त
त्वादप्रमाणत्वमिति केचित्तन्न ॥ भाष्यानुक्तत्वस्योभयत्र तुल्यत्वेदादेरिसिचोपदेशा इति
व्याख्यानस्वीकारः परिभाषायाश्च त्याग इत्यत्र बीजाभावात् ॥ अनन्यार्थद्विर्निपातनापेत्यादि
निर्देशानां ज्ञापकत्वस्य सर्वैरेव वर्णितत्वात् ॥ इग्यणः संप्रसारणम् ॥ यत्तु स्वतन्त्रणरक ४८
वदित्यस्य व्याख्यावसरे तथाप्रकृतेपि यणः स्थाने भवति यस्य संप्रसारणशब्देन जात
स्य संप्रसारणसंज्ञा भवतीत्यर्थ इति भाव ॥ तेन दिवउतो न संप्रसारणत्वमित्युक्तं नवीनै
स्तन्न ॥ इकोगुणवृद्धीत्यत्रेवात्रा इच्याघाराश्रयणे प्रमाणाभावात् ॥ तत्राहत्याद्याश्रय
णे गौरवाच्च ॥ दिवउदित्यत्रस्त्यपि संप्रसारणत्वे दोषाभावात् ॥ नच हलइति दीर्घापत्तिः
॥ तपरकरणेन तद्भावसिद्धेः भाष्यविरोधाच्च ॥ तथाहि भाष्ये इग्यणो भवंतीति योयं वाक्या

३२

र्थस्तस्य पंसंज्ञेति वाक्यसंज्ञापक्षः ॥ तत्र विधायकेसिद्धावपि वाक्यस्योपवपिपसिवादेरनुवा
दस्थलेन सिध्यति ॥ यणः स्थाने य इवर्णः स संप्रसारणसंज्ञ इति वर्णसंज्ञापक्षः ॥ अस्मि
न्पक्षेऽनुवादसिद्धावपि विधौन सिध्यतीत्याशंक्यास्मत्र शाटकवदित्यादिना परिहृतं ॥ न
त्वत्र भवदुक्तव्याख्यानं संभवति ॥ तवता न्तमे बीजं तु वाक्यसंज्ञापक्षे दोषपरिहारायानुवा
दस्थले संप्रसारणाच्चेतः संप्रसारणमिति भाष्यं ॥ नहि तद्विधायकेपि न भवदुक्तं संगच्छते तय
त्तु ननु एवमदुहितरामित्यादौ लस्य स्थाने नेमे कवचुनेइति तस्य संप्रसारणहलइति दीर्घा
पत्तिः ॥ न च यथासंख्यं संबंधाद्दोषः ॥ कृत्स्नस्य तत्रेलकारोपदेशः किमर्थं इत्यादिभाष्य
विरोधादितिचेत्र ॥ प्रदेशेषु यणइग्भिर्त्येव सिद्धेसंज्ञाविधानसामर्थ्येन तद्भावितपक्षाश्र
यणाददोष इति ब्राह्मैः दुत्रो खरेन वैरुक्तं तद्दपि न गौरवात् ॥ लकारोपदेशानां वेपित्रा
कार्यबोधमादाय यथासंख्यसंभवेन भाष्यविरोधाच्च ॥ नहि ज्ञाशतः सामये एव यथासं
ख्य प्रवृत्तिरितिनियमः ॥ परस्मैपदानामित्यादौ तदभावापत्तेः ॥ एवं चोपणइति सूत्रं नारं
भणीयं प्रदेशेष्वेवेग्यण इत्येव वक्तव्यमित्यपरं लाघवमितिदिक् ॥ वसुस्रंसुध्वंस्वनडुहां
दः ॥ अत्र सत्यनुवृत्तं वस्रादीनां त्रयाणां विशेषणं ॥ तेन ॥ पपिवान् स्रस्रुध्वंसुर्मा विवि
उखास्रत् ॥ उखाध्वनइत्यादौ दत्वाभावः ॥ नचानर्थाविति नास्ति ॥ अननि धानादिति वाच्यं ॥
मुनित्रयोक्तिं विना रवेच्छ्या नभिधानस्यायुक्तत्वात् ॥ नच भाष्ये पपिवानित्येवोक्तत्वात्तदनि

मतमितिवाच्यं॥ तस्योपलक्षकत्वात्॥ अत एवोक्तं न चोदाहरणमादरणीयमिति॥ एतेन
व्यभिचारादिप्रतीकमुपादाय यत्स्रंसुध्वंसोर्दत्वं नात्मनेभिधानादतः संयोगांतलोपे तत्रव्य
६९ भिचार इत्यपास्तम्॥ अत एव भाष्यकृता सम्मेत्यनडुहत्रोपपि वानित्यत्वैव वदत्वशंका कृता
ऽनडुह्नौ चानडुह्यामित्यत्रैव दत्वाभावशंका कृतेतिदिक्॥ इति नयोक्रमपास्तं॥ वस्तुत
स्तु मेत्यस्यानुवृत्तिमस्तु॥ अन्तुस्वद्रुमाह न यत्प्रियमां तेकवचनांते वादत्वाभावः॥ यद्वा
नुर्मध्यस्थत्वेन चतुर्ग्रहणमुत्सर्गः॥ ध्यानात्पदृतिरिफांतस्यापि षट्त्वविधानात्॥ न च चत्वा
र इत्यादौ नुगापत्तिः॥ रोन इत्यनेनार्थदृष्टो नुगिति न्यासेन वा रेफांते तन्निषेधात्॥ एतेन रे
फांतस्यापि षट्संज्ञा नानुनकृता॥ चत्वार इत्यादौ नुमापत्तेः॥ तत्र रोनेत्युक्तो नुपदलाघवा
भाव इति शब्देन्दुशेखरोक्तमपास्तं॥ षट्त्रिचतुर्भ्यो हलादिरित्यत्रापि चतुर्ग्रहणकर्त
व्यत्वेन लाघवस्याप्यदृष्टत्वात्॥ न च नमरुणामित्यत्र चतुरन्नावे ऽस्त्रिविधित्वेन तस्यानित्यत्वा
वेशांतत्वाभावात् षट्संज्ञा अत्रत्तौ चतुर्ग्रहणं मार्थकमिति वाच्यं यथोद्देशपक्षे दोषाभावा
त्॥ कार्यकालपक्षेपि त्राष्टार्थलिंगाश्रयेण शास्त्रार्थो न याश्रयत्वादादेशस्य बाहिरंगत्वा ६९
त्तरस्य शास्त्रमात्राश्रयेणांतरंगत्वात् सर्वंप्रवृत्तेः॥ यत्तु शास्त्रद्वारकमिति॥ न चैवं तथा
चर्क शास्त्रास्तरत्वमवाधत्यरत्वमित्यामातं॥ न तत्र प्रिमपचन अमि प्रत्रापि प्रियपंचन
शास्त्रास्तरत्वमस्त्वेवेति दोषतादवस्थ्यमिति वाच्यं॥ एतत्सामर्थ्येन प्रधानीभूतषडर्थवाच

३३

कशास्त्रासारत्वं विवक्षितमित्यभिमानात्॥ इदं प्राचामनुरोधेन द्विवचननिर्देशो गौरवात्स
माहारेण सर्वत्र सूत्रेषु निर्देशादर्शनात्सहंतं॥ तकानां बहुत्वाच्च बहुवचनोपपत्तेः॥ किंच
न षट्स्वस्रादिभ्य इत्यादौ त्रात्र बाहुल्याभिप्रायेण बहुवचनवत्रिस्रुसोजस इत्यादौ प्रयोग
बाहुल्याभिप्रायेण तद्वत्रेहापि बहुवचनं वक्तुं युक्तमिति शब्दरत्नेनवोक्तं॥ तत्र॥
गौणेपि नुडापत्तेः॥ न चेष्टापत्तिः॥ भाष्यादिसकलग्रंथविरोधात्॥ प्रियचतुर्णाम्॥ प्रियहु
नाहुः॥ तपरस्तत्कालस्य॥ द्विर्वचने चीत्यादौ समाहारैकवचनदर्शनेन लघुकरैतो
रसि हैच्॥ किंमः कः न तु इमः इत्येव सूत्रमस्तु॥ त्यदादेरिमच्च इति सूत्रार्थः॥ न चाली
त्यस्य तस्य प्रवृत्तिः नानर्थकेऽलोन्त्यविधिरिति निषेधात्॥ न चेत्त्वापत्तिः॥ अंगवृत्त
परिभाषया निषेधात्॥ स्थानिवद्भावेन विभक्तिपरत्वाभावात्॥ न च कुत्तिहोः कातीत्य
त्रानुवृत्तस्य धर्मावच्छेदकता॥ तत्रापि उतिहोः अतीति॥ न्यासेन निर्वाहात्॥ न चात्यादेशा
गुणापत्तिरिति वाच्यं॥ नानर्थक इति परिभाषया गकार्ये कृते पुनर्नगिकार्यमिति प
रिभाषया दोषात्॥ न चाकच्चिन्निष्ठस्य ककश्रुतिरूपापत्तिः॥ कादेशविषये ज्ञा
ताद्यर्थस्य क इत्यनेन तात्पर्यग्राहकभावेऽप्रतीतेस्तत्राकचोऽनभिधानात्॥ वाक्येनैव त
दर्थप्रतीतिः॥ किंच निर्दिश्यमानपरिभाषया साकच्कस्य कादेशप्राप्तिरपि नास्ति॥ अ
त एव भाष्ये निंधकीत्यत्र कविधित्वं न प्राप्नोतीत्याशंक्यानरंगत्वात्सिद्धत्वेः कत्वमुक्तं॥

कैय्यटेन तु ष्टाप्यास्यासाकस्यकादेशाउक्तः॥ नन्वेवमनादेशेऽपि साकस्य न स्यादिति वाच्यं
॥ विधानसामर्थ्येन निर्दिश्यमानस्य परिभाषाप्रवृत्तेः साकस्य कादेशा इति दुराग्रहे तु इमः
७० कः कृतिलोः अन्तानित्यासः कार्यः त्यदादेरिमं तस्य कः कृतिरित्यारव्यानेन निर्वाहः॥ नच
निर्दिश्यमानपरिभाषया एम एव स्यादिति॥ वाच्यं॥ इमस्त्यदादित्वासंभवेनेमं तस्यैव निर्दिश्यमा
नतया परिभाषाप्रवृत्तावपि दोषाभावात्॥ नच वैयधिकरण्ये नान्वयः॥ सामानाधिकरण्ये
संभवेन तस्यान्याय्यत्वात्॥ तस्मादत्रत्या मनोरमाग्रंथस्य व्याख्यातृग्रंथस्य चापाततरमणीय ए
वेति सुधीभिर्विभाव्यमिति दिक्॥ हलि लोपः॥ हल्यग्रहणमिति वक्तुं युक्तं॥ एवं चाजोत्पत्रां केवल॥
अन्यथानानर्थके इति परिभाषायास्त्रलोप्यां स्तत्रैकफलाभावात्त्स्याख्यातायाः आश्रयणे
गौरवं स्यात्॥ साहमाद्यात्रय लाघवं च॥ इदमोः न्वादेशे॥ आम्नामित्यत्र तत्रौ तु दत्त्वा
दंतोदात्तत्वमुपजीव्योदिदमिति सावेकाच इति वा विभक्तेरुदात्तत्वं न॥ तेनामामितिस ७०
र्वानुदात्तं पदं॥ नङिसंबुद्ध्योः॥ अत्र नसंबुद्धेरिति वक्तुं युक्तं॥ परमे व्योमन्नित्यादावप्य
स्यादित्वे नत्वान्लोपाभावस्य सिद्धत्वात्॥ स्पष्टं चेदं भाष्ये॥ लोके तु पदांतत्वाभावादे
व प्रयोजनाभावात्॥ समासे संभवेऽपि उत्तरपदे प्रतिषेध इति प्रतिषेधात्॥ यत्तु व्याख्या
नं पुंसानीतिलिंगानुरूपि बोधितम्॥ समस्यं तद्यागे पिनन्तुस्समतेति निषेधानित्यत्वेवानपुंस
कानामित्यस्य सिद्धिरिति लाघवमस्तीति प्राहुः हरदत्तेन चैतदुक्तं तन्न॥ एवं लाघवस्याक

३५

रेतु स्थानिवत्त्वेन एव वाग्रहणं कृत्वा व्यवस्थितविभाषामाश्रित्य प्रत्ययलक्षणसूत्रस्यैत
त्रिषेधबोधकत्वमतेति सूत्रस्य तथा वा नपुंसकस्येति वार्तिकस्यापि व्यर्थत्वसंभवात्॥ नच
व्यवस्थितविभाषाश्रयेण प्रत्याख्यानं न चमत्कारावहमिति वाच्यं अनित्यत्वाश्रयणेनापि
व्याख्यानेन तथात्वात्॥ उत्तरपदे इति च्छेत्रे क्रमपि पदं गृह्यते नेन तु सुबन्तमेव तेन राजनी
वाचरति राजनीयती त्यादौ नलोपः सिध्यति॥ नच परमे व्योमन्प्रतिष्ठिते त्यादावसमस्तेऽपि
नलोपापत्तिः॥ पदे इत्यस्य सिद्धेरुत्तरग्रहणोपादानेन हृत्संतग्रतिस्येव ग्रहणात्॥ अचोत्त
रपदशब्दो न रूढः किंतु योगिकः तेन चर्मणि वर्तते इत्यादौ अस्येति मध्यमपदेऽपि भवति॥
॥ भाष्ये तु अपस्य पादित्वेन नत्वपदत्वेसत्येत्यपमेव्योमन्नित्यादौ नलोपाभावोपपादनमिति
सिद्धेसूत्रेऽ ग्रहणं प्रत्याख्यातं॥ तथा च तन्निषेधकं वार्तिकमपि अर्थात्प्रत्याख्यातं॥ न
च संबुद्धयर्थमिति भ्रमितव्यं राजन्वृंदारके त्यादौ समासे संभवात्॥ नलोपः सुप्स्वर॥ स्व
रविधिक्त्राष्टौ भावसंधानः संबंधसामान्यषष्ठ्यंते न समासः॥ तेन राजनिः॥ राजन्मामित्या
दौ स्थानितिनिमित्तो मे भयसंवेपि नियमः प्रवर्तते॥ अत एव भाष्ये सर्वविभक्त्यंतः समास
इत्युक्तं॥ व्याख्यातं च कैयटेन सर्वविभक्त्यर्थकषष्ठ्येति॥ एतेन सर्वविभक्त्यंतावयवकः स
मास इति भाष्ये स्पष्टं॥ विधिकृत्राष्टौ भावसाधनः कर्मसाधनश्च॥ तत्र स्वरादि विषये भावसा
धनः सुप्त्वविषये कर्मसाधन इति प्राहुः हरदत्तो खरोक्तमपास्तं॥ गौरवात्फलाभावाच्चेत्युक्त

त्वाच्च ॥ स्वरविधौ पंचमी अत्र तद्धितार्थेति समासेन लोपे वर्णानिं ह्रस्वपदमिति ॥ अत्र द्विवंश
र्येसंज्ञायामिति समास इति केचित्तन्नासंज्ञाभावात् ॥ यदपीत्यनुवर्त्तमानेन तद्धितार्थेति
७१ समासइत्यर्थ इति तत्समर्थनं ॥ तदपि न संपूर्णसूत्रानुवृत्त्यभावेन ॥ तद्धत्तरमिति त्राह
स्याप्युक्तत्वात् ॥ समुदायोत्तरमिति त्राह इसेकदेशोः त्वयस्याक्लिष्टत्वात् ॥ संज्ञायामित्य
स्याव्यर्थत्वाच्च ॥ नचात्र नलोपस्यासिद्धत्वेपि स्वरविधौ व्यंजनमविद्यमानवदितिविद्यमान
वत्त्वाभावात्स्वरः प्राप्नोत्येवेति वाच्यं ॥ नाप्येयतो नाव इत्येतन्मूलकत्वात्स्वरप्राप्तावित्युक्तत्वा
त् ॥ भाष्यकैयटयोः स्वरविधरुदाहरणं नोक्तं तत्र बिजं चिंत्यं यत्तु संज्ञाविधौ पंचेत्यत्र
नलोपे कृतेपि स्नादिना प्रत्यये षुवक्ष्यतीति मनोरमायामुक्तं तद्भाष्यविरोधादुपेक्ष्यं
तथाहि ॥ संज्ञाविधौ किमुदाहरणं ॥ पंच सप्त नलोपे कृते षट्संज्ञा न प्राप्नोति ॥ असि
द्धत्वाद्भवति ॥ संज्ञायद्गणार्थकं ॥ तन्निमित्तत्वाल्लोपस्य ॥ नाकृतायां षट्संज्ञायां जश्श
सोर्लुक् न चाकृते लुकि पदसंज्ञा न चाकृतायां पदसंज्ञायां नलोपः प्राप्नोति ॥ तदेतदानुपू ७१
र्व्यासिद्धं नवतीत्युक्ते इदं तर्हि इद इदन्नोदन्नरं इति ॥ अत्र नलोपस्यासिद्धत्वात् ॥ घितान्ना
वेद्वंद्वे घित्यस्याप्रवृत्त्याह्रस्व नि पाता नियमः सिध्यतीति ॥ नवीनैरपि न्द्राहृं दुन्नो खरे इत्येव
वोक्तं ॥ इदं तु चिंत्यं ॥ अत्रापि प्रकृतिमात्राश्रयत्वेनांतरंगायां घिसंज्ञायां प्रकृतिप्रत्यया
श्रयत्वेन बहिरंगस्यासित्वात् ॥ यत्वाद्वंद्वे कर्त्तव्ये यः घिसंज्ञकस्य पूर्वनिपात इति व्या

३५

ख्यानेदोषाभावाच्च ॥ तस्मात्संज्ञाविधाविति व्यर्थमिति ज्ञापयति ॥ अंतरंगपरिभाषासिद्धत्वस्याप
यं नियम इति ॥ यत्तु सुप्त्वतद्व्याप्यधर्मावच्छिन्नोद्देश्यकविधयः ग्रहणं ॥ एतेन दंडिभिरित्यादौ षत्वरू
पसुब्विधावप्रामाणिकत्वविधानार्थमिदमित्यपास्तं ॥ वैरूप्यापत्तेश्चेति राह्वेदु त्रोखरेन चेह
क्तं तत्र ॥ गौरवात्फलाभावाद्भाष्यकाराद्यनुक्तेश्च ॥ दंडिभिरित्यादौ षत्वस्य सुब्विनराहृत्तित्वेस्ति
सुब्वृत्तित्वरूपधर्माश्रितत्वाभावेनैवनिर्वाहात् ॥ वस्तुतस्त्विदमर्थमेवत्रासिद्धमित्यस्यानि
त्यत्वेनैवसिद्धत्वात् ॥ संयोगादिमंतात् ॥ वमाभ्यां संयोगस्य विशेषणे न तदंतत्वात्तेन ग्रहणं ये
नविधिरित्यस्यानित्यत्वं ज्ञापयति ॥ तेन समासप्रत्ययविधौ प्रतिषेध उगिद्वर्णग्रहणादिसिद्धं ॥
होहंते क्णिन्नेषु ॥ ननु हन्तेर्ग्रहणमाचष्टे इहन्तयतीत्यादावव्याप्तिः ॥ धातोः स्वरूपग्रहणे इ
ति परिभाषया धातुसंज्ञासूत्रे ह्नेनेनविहितप्रत्यय एव तद्विज्ञानात् ॥ हननीयतेर्णुलि नेदं प्रवर्त्त
तेपेनत्राव्यवधानमिति न्यायेन क्णिद्विषये वर्णद्वयव्यवधाने प्रवृत्तिस्वीकारात् हन्तेरस्त्वसि
॥ अत्र योगविभागे सर्वणत्वनियमः तत्र पूर्वग्रहणं व्यर्थं ॥ अत इति पंचम्यंतेनैव सर्वसि
मंजस्यात् ॥ ननु तपरत्वं विवक्षितमुतन ॥ आद्ये ह्रहाणीत्यादौ णत्वं न स्यात् द्वितीयेप्राघानी
त्यत्रापि णत्वं स्यादिति चेन्न ॥ आद्येप्रकृतिप्रत्ययोभयनिमित्ततया बहिरंगस्यासिद्धत्वेना
दोषात् ॥ द्वितीयेपि घातीत्यत्र तु पथो द्वेत्रापक्षे बहिरंगपरिभाषाप्रवृत्त्या वस्तुवत्त्वाभावेनादो
षात् ॥ न च करणे यो विद्ध्वषुडुत्यनेन हन्तेर पत्यये घनादेशो पूर्वपदादितिणत्वे दुघनाइत्यत्र

वप्रघन इत्यत्रापि सूत्रेषु घन इत्यनेन निष्पन्नत्वाद्विशेषाद्दंतेरिति णत्वं स्यात्तथा प्रघनाघन इ
७२ त्यत्रापीति वाच्यं प्रघणः इति कृतणत्वनिर्देशेनोपसर्गान्तरस्य घनस्य णत्वाभावज्ञापनात्
॥ एवं मंतघनो देशः इत्यनेन विनिष्पन्नेपि संतात्वात्पूर्वपदादिति णत्वं न भवत्येव ॥ अंतर्घणो
देश इति णत्वविधिरपि गोयुक्तः ॥ नाप्यरीत्या तु नेमे हंत्यादेशाः किंतु अखंडनिपातनानि ॥ अन्य
थापि त्वात्तुदान्तेत्वे घन इत्यं तोदात्तं न स्यात् ॥ आदेशपक्षे तु घन इत्यकारांतस्यादेशो नुदा
त्तांतो विधेयः ॥ तस्य लोपे ऽनुदात्तस्य च यत्रोदात्तलोप इत्यनेनोदात्तत्वं विधेयमिति क्लेशः ॥
नदीत्यायघन इत्यत्र णत्वशंकापि न ॥ प्रघनाघन इत्यत्र हंतिस्थाने घनाघनादेशाभावेन हं
तित्वाभावाण्णत्वशंकैव नास्ति ॥ धाहद्वितस्य द्विः प्रयोगत्वेपि विकारागमाभ्यां हंतित्वाभावा
त् ॥ पूर्वज्ञापकेन सिद्धत्वाच्च ॥ वार्त्तिककारेण तु पूर्वयिहणपक्षे कचित्कार्यकालपक्षेः क
चिद्यथोद्देशपक्षे योगविभागबाध्यसामान्यचिंता चेति गौरवात् ॥ कुत्सुथ पादायहादेशाक ७२
वर्गव्यवाय इत्यर्थः ॥ अपार्थत्वाद्वार्त्तिके समासः वा वार्त्तिके हादेशः इत्युक्ते कुघणइत्यादौ ह
र्वपदादिति णित्वं सिध्यति ॥ तत्र हि हंतेरतत्प्रत्ययो घनादेशश्च ॥ अत एवागारैकदेशे
इति सूत्रे प्रघणप्रघाणयोः कृतणत्वयोरुच्चारणं ॥ तत्रापि हंतेर्घनो घादेशविधानात् ॥
न्यापत्वादिति ॥ न च वार्त्तिकरीत्या बकुहत्र हाणेति णत्वमायाति सूत्रारंभेतु नेति वार्त्ति
कारंभस्येवन्याय्यत्वात्कथं न्याय्यत्वं ॥ बहिरंगत्वेन दीर्घस्यासिद्धत्वे तु प्राघानीत्यत्र दोषः ॥

तथा सूत्रारंभे प्रघन इत्यत्र णत्वं प्राप्नोति वार्त्तिकरीत्या तु नेति वाच्यं ॥ अस्मृवस्येत्यनेन हस्ता
निकवर्गाभावर्तते रेवोपलक्षणेनादोषात् ॥ प्रघाणप्रघणयोः कृतणत्वयोरगारैकदेश
इति सूत्रे उच्चारणमत्रत्यात्स्वयिहणस्यो कार्थेपि लक्षणत्वेमानं पूर्वत्वनिपातकल्पना
पेक्षयोक्तार्थतात्पर्यग्राहकत्वादिति नाव लादेत कुनयतोक्तं वार्त्तिकार्थेपि संग्रहस्येतीतिन
वीनोक्तमपास्तम् ॥ मनोरमायां वार्त्तिकार्थेपि संग्रह इत्यत्रार्थग्रहः प्रयोजनवाची तेन ह
त्रघ्नः सुघ्नः प्राघानीति सूत्रेणैव सिध्यंतीत्यर्थः ॥ ननु त्वदुक्तविधयपरः ॥ तेन हस्तानि
कवर्गाभाववदिति मूलव्याख्यानमनुचितमेव ॥ किंचात्र हस्तानिकवर्गाभाववर्द्धतित्वा
वेन णत्वापत्तेः ॥ नांतः कुघण इत्यादौ णत्वापत्तेः ॥ निर्वीजलक्षणापत्तेर्गौरवाच्च ॥ उगिद
चां सर्वनामस्थाने ऽधातोः ॥ अधातोरिति ग्रहणं नियमार्थं ॥ औपदेशिकधातोर्विहितप्रत्य
यस्य चेदुगित्कार्यं तर्हि निलोपि नां चनेरवेः ॥ तेन यथाक्रममुखास्रन्धमीत्यादीनां व्याख्या
प्रत्यय विषये मानं तु लाघवाद्व इति यत्कवेः ऽधिकसंग्रहार्थं वकुच वचने तेन धातुत द्विहि
तप्रत्ययोर्नियमः ॥ एवं चाधातु ग्रहणं सुत्यजं ॥ नन्वेवं ग्रामीत्यादाविव विदानिमित्रापि तु
मोनापत्तिः ॥ वसोर्धातुविहितप्रत्ययत्वादिति चेन्न ॥ औपदेशिकप्रत्ययत्वस्य विवक्षितत्वा
त् ॥ वसोस्त्वादिति देशिकप्रत्ययत्वं न तु औपदेशिकं ॥ यद्वा स्यानुगित्वादेव सिद्धे पुनरुगि
त्करणसामर्थ्यात्तुम् न भविष्यति ॥ वसोरुगित्करणस्य विशेषणार्थत्वे तु तत्प्रत्ययो

णोकरणसामर्थ्यान्नुम न विप्रतिपत्ति।। वमोरु दुकारान्तधातुविहितप्रत्ययस्य न व तुगित्कार्यं
।।धिनुणस्तुनोकारान्तत्वमिति न नुम्।। यद्यपि पीवानिति निर्देशो न भवति वस्य तस्य नुम्
७३ ।। नन्वोपदेशिकधात्वोश्चेदिति नियमे गोमानिति वाच नीत्वोगोमानित्यत्रोगित इति ङीपुप्र
संगः।। नचेष्टापत्तिः।। सूत्रभाष्यविरोधादिति चेन्न।। उगितश्चेत्यत्र चकारस्यैवकारार्थत्वेन
संज्ञान्तरानुपहितप्रातिपदिक एव तद्विधानात्।। अन्यथा तु संज्ञोपहितप्रातिपदिकत्वात्र
दोषः।। नन्वेवं प्राचीत्यत्रापि ङीप् न स्यादिति वाच्यं।। अनोपदेशे केति विशेषणात्।। ननु
चकारादेतादृशार्थः कथं लब्ध इति चेत्।। तत्रैतेनेत्यत्रेति न्याहेनार्थाविशेषवदत्रापि संभ
वात्।। भाष्ये तु सामान्यनियमं स्वीकृत्य युवोरनाकाविति सूत्रेण पुंसकस्य ऽलच इत्यत्र योग
विभागमाश्रित्य नलच इत्यनयोः शेष इति व्याख्यानाद्यमिस्यादेनुमभावः साधित इति दिक्।। न
संप्रसारणे संप्रसारणं।। इदं सूत्रं त्यक्तुं शक्यं।। ङ्यापा इति सूत्रमते कार्यकालपक्षे माध्वि सं
कवायत्याविधानायणप्रत्ययपरत्वेन संबन्धस्य रयण एव येन नाव्यवधानमिति न्यायेन
तत्संभवात् सूत्र्यणः प्राप्त्यभावात्।। यथोद्देशपक्षेपि वाक्यस्य तदर्थस्य वासंनिधानात् वेका
धूम्भवात्।। मद्गु करोतापरेशो धेवेण्णाः इति कृत्वा सूत्रप्रत्याख्यानपक्षेपं तु यस्ल इ पेपि ७३
पोदोनावात्।। न च भाष्ये तत्प्रत्याख्यातमिति वाच्यं।। लाघवानुरोधेन तत्स्वीकारे बाधकाभा
वात्।। नन्तु पार्थे न्याय ह: अपेपप्रतिपत्त्यर्थं तिषामवस्थितत्वात्।। एवं चेप्पणसूत्रं न संप्रसा

३१

रणेतितान्निषेधसूत्रं च न कर्तव्यमिति महद्लाघवम् निषेधसामर्थ्यं च नाश्रयणीयमिति दि
क्।। अवर्णस्य सावनञः।। अत्रासाविति प्रसज्यप्रतिषेधः।। न तु पर्युदासः।। बकर्वादित्यसिद्धा
पत्तेः।। ग्रंथकारैरपि न तु साविति वदद्भिरस्यैवांगीकारात्।। एतेन पर्युदास एव सूचितः प्र
त्ययत्वेन च साहचर्यमिति नवीनोक्तिरपास्ता।। अनञः किं।। अनवेति न पुंसकप्रत्युदाहरणं न
तु पुंल्लिंगं इंगविकल्पत्वात्।। एतेनानञः किमिति।। अनञ इत्यस्याकः शब्दो व्याहृत्य स्य
र्थः उत्तरमनवेति।। यञ्चनंज्ञा इष्टमदृशोत्यावत्यदिति केचित्।। तन्न।। अंगेन प्रत्ययेपि नपुं
सके प्रत्ययपरत्वाभावेन ह्रस्वादेशापत्त्यभावप्रसङ्गेः।। अन्यथा वप्रिय इत्यत्रापि स्यादत्र ह्रस्व
त्वं वावैति श्रीहर्षप्रयोगोपि तत्र तु कल्पः।। अत एव मूले ऽक्षेणाक्षेपे णो वसिंहे पर्युदासे
प्रयोजनाभावात्प्रसज्यप्रतिषेध एवाश्रितः।। इदं च सूत्रद्वयम् वर्णस्य मघोन अनत्रिप्यंखां
दसंहितमनुवन्स्याविधानाच्च छंदस्युभयदर्शनादिति वार्त्तिककारेण प्रत्याख्यातं।। तथापि
तत्रोदिवास्मात्रं।। सोपरतः नञः परस्य च प्रतिषेधार्थतयोरावश्यकत्वात्।। न च छांदस
त्वेन निर्वाहः।। वैदिकमात्रप्रयोगविषयाणां सूत्राणामेव वैयर्थ्यापत्तेः।। तेषां स्वीकारेणो
ऽनयोः प्रत्याख्याने विनिगमकाभावात्।। न च भाष्यकैयटयोरपि तथोक्तमिति वाच्यं।।
वार्त्तिकानुयायवर्णनमात्रपरत्वात्।। एवं च लोकेपि प्रयोगो निर्बाधः।। अत एव कोशे
अन्यपर्याये इंद्रपर्याये च तयोरुपादानं।। नहि केवलच्छांदसानां लौकिकपर्यायेषूपा

दानमस्त्रीतिरिकः॥ पथिमथ्यृभुक्षामात्॥ अत्रऋदित्येव सुवचं॥ एवं चोत्तरसूत्रे ऽ इतिन
कर्त्तव्यमितिलाघवं॥ नचपररूपापत्तिः॥ पथिमथ्यृभुक्षांलोपः॥ नस्यटेः॥ इतः सर्वनाम
७४ स्थाने इतिन्यासेन सिद्धेः करणसामर्थ्यात्॥ अत्रसानुनासिकव्यावृत्त्यर्थप्रश्लेषोपि मास्तु
विधीयमानत्वेन तत्रकालप्राप्त्यभावात् पररूपकरणसामर्थ्याद्गुणान्तरव्यावृत्तिसिद्धेः॥ यत्तु
भाष्ये तत्तु नासिकविधाने प्रतिपत्तिलाघवाय तस्यैवोच्चारणे कार्ये नतदनुच्चारणं बहुरूप
वविधानमित्युक्तं॥ एतेन पथीयतेः क्विपि पंथा इत्यादीत्यपास्तं॥ अत्रऋदर्थतदनुच्चा
रणस्यावश्यकत्वेन भाष्यासंगतेस्तस्यात्र दर्शनिधानमेवोचितमिति त्र्याहेंदुशेखरे नव्ये
रुक्तं तन्न॥ तत्सूत्रे तादृग्भाष्यानुपलंभात्॥ इतोत्सर्वनामस्थाने इति तत्परत्वं विव
क्षितं॥ तेन पथीयतेः क्विपि पंथियावित्यादिसिद्धिः॥ नचनचकेवलः पथिन्शब्दः स्त्रिया
मस्तीति युवोरनाविति सूत्रस्थभाष्यात्तदर्शनिधानमिति तन्नपोक्तं युक्तं स्त्रियामनिधाने
पि पुंल्लिंगैतत्संभवात्॥ वस्तुतस्तु केवलपक्षे दीर्घादीनामसामर्थ्यात्सदंतरविशिष्टस्य सु ७४
पंथीत्यस्य स्त्रीत्ववत् क्विबंतस्यापि तत्संभवात्॥ विवेचितं चैतदरिकोगुणवृद्धीति सूत्रे
एवं च स्थान्यादेशयोरुभयोरपि तत्परकरणसार्थक्ये स्तइति अदिति च तपरकरणं मु
खसुखार्थमिति न वोक्तिरयात्वे तिरिकः॥ थोन्थः॥ थोन्थइति सुवचम्॥ नच इत्संज्ञा
पाश्चाद्यंतावित्यस्य चानुसंधाने प्रक्रियागौरवमिति वाच्यं यथान्यासेपि षष्ठीस्थानेत्य

स्यानुसंधाने ऽकारविशिष्टउत्तहजंन इतिसंदेहे व्याख्यानाश्रयणे तु नस्यतुल्यत्वात्॥ नोपधा
याः॥ उपधायहणं नामकर्त्तुं॥ दीर्घश्रुत्योपस्थितनाच्पदेन नामीत्यस्य संबंधे येन नाव्यवधान
न्यायेन पकाराकारात्॥ व्यावृत्तिसिद्धेः॥ नचइनहइत्यत्रोपधानियमार्थं तदन्यथा वृत्रहा
यतेइत्यत्राकृत्सार्वेति दीर्घस्यापि नियमः स्यादिति वाच्यं॥ परस्परसाहचर्येणानजंतदीर्घ
स्यैव तत्त्वाकारात्॥ एवं चानजंता क्विपि वृत्रहा इति रूपं बोध्यं॥ यद्यपि भाष्ये इनहनि तत्रोपधा
ग्रहणमनुवर्त्त्य तद्विषयकनियमेन वृत्रहायते इति रूपं साधितं॥ तथापि तत्सूत्रानुरूप्यकाणि
मात्रं॥ ननु वस्तुस्थितिः॥ अहास्व थो न्थः॥ अत्री उ इति वक्तुं युक्तं॥ सकारस्थौकारे अहा अउ
इति स्थिते आ गुणो वृद्धावपवादविति रूपसमसिद्धत्वात्॥ नच सवर्णदीर्घापत्तिरिति वाच्यं प्रकृ
तिप्रत्ययाश्रितसवर्णदीर्घापेक्षया प्रत्ययाश्रितगुणस्यांतरंगत्वेन प्रवृत्तिसंभवात्॥ अ
ह्नानामिति॥ अत्रनोपधाया इति दीर्घः॥ ननु अहन आ विभक्तावित्यात्वम् संनिपातपरि
भाषाविरोधात्॥ षष्ठ्यां नामुपजीव्य जातस्य नुमस्तद्विघातकत्वात्॥ दीर्घस्तु नैवं॥ नच न
कारलोपे स्यैव संनिपातविरोध इति वाच्यं॥ नुटो नकारनिमित्तकत्वाभावात्॥ षष्ठ्यंतायाः
स्तन्निमित्तकत्वेपि तस्यां कर्त्तव्यायां नलोपस्यासिद्धत्वेन संनिपातविघाताभावात्॥ एवं च
परिभाषानित्यत्वे नात्वप्रतिपादकः मनोरमाग्रंथस्तद्व्याख्यातग्रंथश्चोपेक्ष्यः॥ संनिहिते
ति॥ तेन णितादीनां न॥ आतिदृ किं॥ रुरुदिषेइत्यादौ नेड्वशिकृतीति निषेधो मा भूत्॥

क्विन्नन्त्ययस्य कुः॥ प्रत्ययग्रहणसामर्थ्यादितः कुणसंविज्ञानो बहुव्रीहिः॥ नच प्रत्ययग्रह
णाभावे क्विन एव कुत्वं स्यादिति वाच्यं॥ तस्यासिद्धत्वात्॥ एतेन नन्वच तद्भावे चस्य कुत्वापत्तिः
७५ ॥ तथा सति क्विनो घ इत्येव वदेदिति शब्देन्दुशेखरोक्तमपास्तम्॥ प्रत्ययग्रहणेन तदंतग्रहण
मिति तदंतस्यैव संभवात्॥ नन्वेतत्कुणबहुव्रीह्याश्रयणे रज्जुसृट् उपपदं इत्यत्र क्विन्यपि
कुत्वं स्यादिति चेन्न॥ स्पृशोऽनुदके क्विन्निति सूत्रे कास्य ह्यञ्चेति सूत्रे च भाष्ये रज्जुसृड्भ्यामुपपदका
स्यतीति प्रयोगात्स्त्रीत्यपज्ञोः॥ यदांते कुत्वाभावज्ञापनात्॥ विश्वस्य वसुराटोः॥ अत्र विश्व
शब्दः सर्वपर्यायो गृह्यते॥ ननु देवताविशेषवाचीव्याख्यानात्॥ अन्यत्र कृपदार्थत्वा॥
दा॥ राट् समभिव्याहृतविश्वशब्दस्य साहचर्यात्॥ एवं च आदित्यविश्ववसवः इत्यमरप्रयोगः
संगच्छते॥ शब्देन्दुशेखरे तु नरे संज्ञायामित्यत्र संज्ञापदापकर्षणेदायप्रयोगः साधितः
तदसत्॥ देवताविशेषवाचिनोऽपि॥ विश्वेदेवाः दत्त्वास्य ताः इति संज्ञात्वात्॥ संज्ञापदाप
कर्षणेनापि स्यादित्वसंभवात्॥ स्कोः संयोगाद्योरंते च॥ ननु पृथक्स्कोतापयः क्षितिरित्या
दावपि लोपः स्यादितिचेन्न॥ अत्र केचित्त्रजादेः प्रत्ययस्यैव लोपमिच्छंति॥ अन्येतु लाद ७५
शप्रयोगाणामनभिधानमेव तत्त्वमानं तु काष्ठतक्षणेव नास्ति कुतः काष्ठतक्षरव्यातितिना
प्यमाकुः॥ मम तु प्रतिभाति॥ झलीत्यत्रापि पदस्येत्यस्य संबंधात्संयोगांतलोरेकपद
स्थत्वे एव लोपः॥ तथा च न कोपि दोषः॥ तदोः सः सावनंत्ययोः॥ अत्रानंत्यग्रहणान्ना का

३९

मकर्तुं॥ तकारस्याद्वस्वर्थेणां अन्ये तु नंत्यस्यैव संभवात् केचित्तु हे से सा दोषस्ते नाते पि पुनः प्र
संगविज्ञानेनात्वमाकुः॥ अन्ये तु दस्य चेत्वं तर्हि छिदस एवेति च्छदसयोगं विज्ञात्यर्थमाकुः
॥ ङे प्रथमयोरम्॥ अत्र प्रथमा शब्दः प्रथमाद्वितीयासमुदाये गौणः॥ तथा चैकपदमेव
लक्षणार्थं मानं त्वमुवाधनार्थं शसोनेति सूत्रस्थनिषेधस्यापरं नाप्यमेव॥ अन्यथा तस्मा
दित्यनेनैव सिद्धे तदार्थं स्यात्॥ एवं च ङे इति धुसमष्टीकमिति केचित्॥ किंच पृथक्
पदत्वेपि वचनभेदे रित्याशंका तु॥ तस्मान्मनोरमायां पृथक्पदत्वस्वीकारो व्यर्थः॥ लाहो
सो॥ अवाकारो विवक्षितः॥ एवं च स्पष्टप्रतिपत्तये त्वाहोसा विस्पष्टं वक्तुं युक्तं॥ एवं च
मात्रालाघवं प्रक्रियालाघवं च भवति॥ न च णिजंता क्विपि युष्मच्छ्रस्मा इति प्रातिपदिक
योरादेशे विशेषोऽस्तीति वाच्यं॥ सोरमादेशे विशेषाभावात्॥ न च नपुंसके लुगापत्तिः म
करप्रश्लेषेणाङ्गाभाववत्त्वात्याप्रवृत्तेः॥ एतेनादेशयोर्हिजंतत्वेहे कतरदित्यत्रेव हेत्व
हेत्वहेस्यत्र मलोपेन स्यादिति केषांचिदुक्तिरपास्ता॥ एवं च क्रियात्तत्र मलोपाभावे हे त्वं हे
हमिति मांतस्यैव तत्र साधुत्वात् त्यदादेः संबोधनाद्य॥ शेषे लोपः॥ अत्र शेषग्रहणं शेषा
मकर्तुमपर्यंतस्येत्यस्य संबंधे विभक्तिविपरिणामेन पर्यंतात्परस्य लोप इत्यर्थसंभवात्
॥ अल्लोपस्य परिभाषात्तु न प्रवर्त्तते नानर्थक इति न्यायपरिभाष्यया॥ एवं चात्सलोपं इति पक्षो नि
र्मूलः॥ न च सामञ्चाकमिति समुच्चनिर्देशः ज्ञापक इति वाच्यं॥ टिलोपे स्वीकृत्यामञ्चकमि

तिंलघुन्यासेनलक्ष्यनिर्वाहेगुरुन्यासस्यवृत्तिद्वैगुण्येनज्ञापकस्वीकारेफलाभावात्॥ किंचास्य
लोपेयुष्माकमित्यत्रनुडुर्वारः॥ यदिनिर्विभक्तिकत्वसंयोगेनिप्रवर्त्तते इति ब्रूयेत हिच्छतित्वाक
मित्यत्रनुडापत्तिर्दुर्वारैव॥ नाप्येतुस्त्वाशयवर्णनमात्रंनतुतत्त्वाग्रहः॥ एवंचटिलोपप
७६ क्षएवसर्वसंमतइतिदिक्॥ त्वसीमम्॥ अत्रामभित्येवपदच्छेदः॥ नतुत्वमिति॥ अन्यथा
लाघवात्स्पष्टप्रतिपत्त्यर्थंत्वममत्वमइत्येववदेत्॥ अत्रामम तुपक्षद्वयेपिसाधुरितिकौमु
द्यांतत्त्व॥ णिजंतात्क्विपिनमुत्वमितिरूपेविशेषसत्त्वात्॥ अंत्यलोपपक्षेक्विपिरीलोक्विसंभवा
भावेनफलाभावेनचपक्षद्वयाभावाच्च॥ एकतिङ्वाक्यमिति॥ एकतिङर्थमुख्यविशेष्य
कंवाक्यमितिनिष्कर्षः॥ नचदेवदत्तेनज्ञापितत्वमित्यादौव्याप्तिः॥ अस्तिनवंतीत्यपरोक्ष
युत्समानोप्यस्तीतिनाध्याहारेणाप्यसंभवात्॥ एवंपचतीत्यत्रापिअ
ध्याहृतकारकमादायैकवाक्यत्वंबोध्यं॥ समर्थसूत्रभाष्येआख्यातंसविशेषणंवाक्यमित्यु ७६
क्तं॥ तत्राख्यातशब्देनधातुर्वोच्यतेसर्वमाख्यातंनामेत्यत्रतथादर्शनात्॥ तेनदेवदत्तेनज्ञा
पितत्वमित्यादौनाव्याप्तिः तत्रैवोत्तरभाष्येएकतिङ्वाक्यमितिलक्षणमुक्तं॥ तत्रतुतिङ्स
मानाधिकरणेप्रथमेतिन्यासेसर्वत्रतिङ्समानाधिकरणपदस्यविद्यमानत्वात्॥ ज्ञापकत्वा
द्देवदत्तेनज्ञापितत्वमित्यादावपिपदाध्याहारेणैवबोधात्सर्वत्रैवतिङ्तार्थमुख्यविशेष्यत्व
स्यग्रहिबूहिदेवदत्तेत्यादावपिसत्त्वाच्चेदमेवादर्तव्यमितिसूत्रपिबुमुत्त्रस्त्रोपादानम्॥मी

५०

मांसकैरपिअर्थैकत्वादेकंवाक्यंसाकांक्षंचेद्विभागेस्यादितिसूत्रकृतम्॥ आख्यातंचार्थैकत्वादेकं
वाक्यंसाद्भावनैकत्वादिति॥ नचदेवदत्तः॥ भुंक्ष्वेत्यत्रदत्तशब्दतारांवयैकवाक्यतापत्तिः॥ एक
तिङ्तार्थमुख्यविशेष्यत्वस्यसत्त्वादितिवाच्यम्॥ कारकभेदेनक्रियाभेदस्वीकारात्॥ तार्कि
कैस्तुअर्थैकत्वात्प्रयोजनैकत्वादितिव्याख्यातं॥ एवंचप्रत्यक्षानुमानयोरप्येकत्वंप्रमाणनि
रूपणारूपप्रयोजनैकत्वादित्युक्तं॥ ननुअर्थैकत्वादितिकिंस्योनंतेमदनंकरोमिघृतस
धारयासुवर्णंकल्पयामि॥ तस्मिन्नसीदद्भीरिणमेदःस्तुमनस्यमानइत्यनेनविरुद्धं॥ तथा
हिप्रत्यक्षस्यानुमानपेक्षत्वेपिअनुमानस्यप्रत्यक्षसापेक्षत्ववदिहसदनप्रतिपादकस्यसा
दनप्रतिपादकानपेक्षत्वेपिसादनप्रतिपादकस्यसदनप्रतिपादकसापेक्षत्वस्यतुल्यत्वम्
एवंचयदितत्रैकवाक्यत्वंसंमतंतर्हिअत्रापिस्यात्॥ यागसाधनरूपप्रयोजनैकत्वस्यचा
त्रसत्त्वेनउभयोस्तुल्यत्वात्॥ किंचप्रत्यक्षानुमानयोराथकांक्षानतुक्रियाकर्मणोरिवज्ञा
त्॥ यथैकवाक्यतास्यात्॥ वाक्यार्थबोधेतस्याएवनियामकत्वात्॥ यदिस्यात्तर्हिचैकात्म
निप्रत्यक्षसंगतिमत्त्वात्देकंवाक्यमितिवक्तुमुचितंनतुयत्किंचित्स्वार्थवर्णनंतादृशैकवा
क्यत्वेफलाभावाच्च॥ त्वंपरतव्रप्रतिष्ठानविष्यानीत्यत्रप्रतिष्ठारूपप्रयोजनैकत्वादेकवा
क्यत्वेतेनादेशापत्तिश्चेतिदिक्॥ केचित्तुतिङ्सुबंतचयोवाक्यंक्रियावाकारकान्वितेति
वाक्यलक्षणमुक्तं॥ तत्राद्यंतत्तिङ्नाध्याहारेणैवसर्वत्रबोधोक्तितीयंतुतंविनापिबोधे

इतिविवेकः॥ शब्देन्दुशेखरे तु तिङ्‌ न्तसुबन्तं चयः तिङ् सुबन्तं चयः वाक्यसंज्ञेत्यर्थः पचति
भवति देवदत्तेन शायितव्यं चैत्रः पचतीति यथाक्रमं उदाहरणानि इदं तु लौकिकवाक्य
लक्षणम्॥ शास्त्रीये कवाक्यलक्षणं त्वेकतिङ् वाक्यमित्युक्तं॥ तत्रं शास्त्रीये गौवनिर्वा
७८ हे लौकिके फलाभावात्॥ तिङ् ते सर्वत्र क्रियायास्त्वेन क्रियायां चेत्कारकान्वि सर्वसंमतत्वेन
भवदीत्यादि इ॰ सुबंतचयाभावात्तत्राव्याप्यापत्तेश्च॥ आद्यमिकद्विवचनस्याद्धिः प्रयोग
पक्षे लुनीहि लुनीहीत्येवं लुनातीत्यादौ निपातनप्रतिषेधार्थमति इ॰ ग्रहणस्य सार्थक्यं भाष्ये
तन्मतास्वानं वार्त्तिकाशयवर्णनमात्रं न तु तत्राग्रह॥ सामंत्रितं॥ संबोधने इति प्रथमा
पदं चानुवर्त्तते तेन संबोधने विहितप्रथमान्तमामंत्रितमिति सूत्रार्थः॥ तथा चात्र स
कारग्रहणं मास्तु॥ न चात्र संज्ञाविधित्वात्तदन्तविधिर्नेति वाच्यं॥ महासंज्ञाकरणेन सं
ज्ञाविधावित्यस्याप्रवृत्तेः॥ न च फलाभावः॥ हे हे तौ इत्यादीनां तत्सिद्धेः फलत्वात्॥ अ
न्यथा नखनि निन्नि इत्यत्रेव निस भावादेरभाववदत्र प्रथमाभावादामंत्रितसंज्ञानस्या ७८
त्॥ समः समि॥ समो मि इ॰ समस्मातिवा सुवचम॥ तिरसस्तिर्यलोपे॥ अत्रालोपे इ
ति मास्तु॥ न च तिरश्चैत्यत्र स्यादिति वाच्यं॥ अकारनकारलोपे च कारमात्रस्यांचतिला
भावात्॥ नवीनरीत्याक्षधिकविकारैकदेशविकृतन्यायस्याप्रवृत्तेः॥ असमद्दीसे
कदेशविकृतन्यायेनांचतित्वेपि श्चं चतिपदस्य तंत्रादिनाताद्दृशं चलोपरेइति व्याख्याने

५१

न दोषाभावात्॥ यञ्चातिरसस्तिर्यचीतिन्यासः कार्यः पूर्वोक्तिरेवार्थः॥ न चाद्यलोपात्स्वर्वमि
वतिपदादेशः जातित्वमस्त्वेवेति वाच्यम्॥ अकृतव्यूहपरिभाषया तत्राप्रवृत्तेः॥ न चाचः
परस्मिन्निति स्थानिवत्त्वं॥ अजग्रहणसामर्थ्येनाचः परस्मिन्नित्यस्याप्रवृत्तेः॥ यद्वा
चिचकारादिनिर्देशे च नावित्यर्थः तथा चास्मिन्पक्षे न कोपि दोषः॥ तिरसो विरिङ् इति
न्यासेमात्रालाघवसत्वेपि इ॰ त्वसामर्थ्याश्रयणमिति तत्केशाः॥ किंच यथान्यासे तिर्यचिमा
चष्टेति रायवतीत्यादौ टिलोपेनांचतेर्लुप्तत्वेन लोपरहितांचतित्वाभावादव्याप्तिः॥ तद
र्थं किं धात्वादिपररूपेण लुप्ताकारं चतावितिव्याख्याने केशाः॥ अस्वसंतस्य चाधातो
रंगविशेषणात्तदंतविधौ सिद्धे तग्रहणमंतमात्रे दीर्घो यथा स्यादित्येतदर्थं॥ तेन
गोमानित्यादौ दीर्घः सिध्यति॥ अन्यथोपदेशे क्तवतोरेवात्वंतत्वात्तत्रैव दीर्घः स्यान्न तु
मतुपः॥ स्योपदेशप्रयोगे चात्वंतत्वाभावात्॥ एतेनांगविशेषणतया र्थसिद्धतदंतविधे
रनुवादकमंतग्रहणमिति शब्देन्दुशेखरोक्तमपास्तम्॥ अनुबंधानेकांत इति पक्षेवा
योज्यम्॥ अदसश्चोसुलोपश्च॥ अदसष्टेरित्येव वक्तुमुचितम्॥ त्यदादीनामइत्यत्रावि
नक्तविति विषयसप्तमीस्वीकारादिति केचित्॥ एवमत्वेण्यादेशे टिलोपे लौः साविसस्य
सिद्धत्वात्॥ एतेनन तुसोशेऽइत्येवास्त्विति चेन्न॥ असावित्यत्र टिलोपे कृते नित्यत्वात्सं
बंधित्वात्सदाद्यत्वे सा विसर्यसिद्धेरिति शब्देन्दुशेखरोक्तमपास्तं॥ वितन्काविस्यस्यावि

पयसप्तमीत्वेनसत्वात्सर्वमेकत्वप्रसक्तेः॥ अस्तुवापरसप्तमीतथापितयोः सः सावनंत्ययो
रित्यतः सः सावित्यनुवर्त्तते॥ तेनसकारोप्यनेनविधीयते॥ तथाचरूपसिद्धेः स्पष्टत्वात्॥
परंतुअस्मिन्पक्षेऽदसइत्यस्यपंचमीत्वंषष्ठीत्वंसमावित्यस्यषष्ठीत्वंसप्तमीत्वंचकल्प्यमि
७८ तिगौरवम्॥ यत्तुननुसौरेवौत्वंविधीयतांत्यदाद्यत्वेनामावितिसिद्धेः किंसुलोपविधाने
नमेवं॥ असकौस्त्रीत्यत्रयपिप्रत्ययस्थादितीत्वप्रसंगादितिमनोरमायांतीकमुपादायन
चेत्वविधायकेस्याआवितिप्रस्थिहतिनिर्देशान्नेत्वं॥ कारिकेत्यादावपीत्वानापत्तेः॥ तस्मा
त्सस्थिहतिनिर्देशोनात्रेत्यत्रैवनाप्येस्यहे॥ एतेनत्यदादीनामइत्यत्रविभक्तावित्यस्य
विषयसप्तमीत्वमपास्तं॥ एवंहिविभक्त्युत्पत्तेः पूर्वंत्यदाद्यत्वेटापिसावदसइत्यस्योत्वेपि
स्त्रानिवत्वेनाप्राप्तिर्दृष्टपरिभाषायांसत्यांविषयसप्तम्यावक्तुमशक्यत्वाच्चेतिदिकइत्य
नेनविषयसप्तमीत्वखंडनंशब्दरत्नेकृतं॥ तत्तुमदुक्तस्यासंगतत्वाद्वेरौवद्यंतमिति ७८
दिक्॥ ॥इतिश्रीगोवर्द्धननन्दात्मजरघुनाथसुतमौनिश्रीकृष्णभट्टकृततर्कचंद्रिका
यांहलंतपुंल्लिंगसमाप्तः॥ ॥अपोभि॥ शूयमाणपकारांतापुल्लाशब्दस्यग्रहणा
म्॥ तेनप्रत्ययग्रहणेनतत्रएकारस्यलुप्तत्वेनापरूपस्यतर्केविशेषगोचरात्॥ स्पष्टंचेदं
दाधास्वदावितिसूत्रे॥ एतेनाबितिप्रत्ययोगृहीतेनव्याख्यानादितिशब्देन्दुशेखरोक्तमपा
स्तं॥ प्रत्ययग्रहणपरिभाषयाप्रत्ययस्यैवग्रहणापत्तेः इतिहलंताः स्त्रीलिंगाः॥ द्वितीया

५२

दोस्वेनत्॥ तांतोयमादेशः॥ तत्सामर्थ्यात्पुंसकेलुकालुप्तेपिप्रवर्त्तते॥ एवंचवात्तिकमेत
द्विधायकंनकर्त्तव्यं॥ समासेपिएवमेनदादेशोबाधकाभावः मनोरमायांतुतदभावउक्तः॥
शब्दरत्नेः यत्नेनदांतउक्तः सचतकारोच्चारणसामर्थ्येनित्यस्मिन्पक्षेयथाविरुद्धः॥ इतिहलंताः
नपुंसकलिंगाः॥ स्वरादिनिपातमव्ययं॥ अत्रनिपातग्रहणंसुत्यजं॥ चादीनांस्वरादिपाठे
नैवनिर्वाहात्॥ नचपश्वादिशब्दानांसत्ववाचिनामपिअव्ययत्वापत्तिः॥ अव्ययमितिम
हतीसंज्ञाकरणेनलिंगसंख्याभावविशिष्टएवतत्प्रवृत्तेः॥ एवंचस्वरादेश्शब्दानांकारक
शक्तियोगेपिलिंगसंख्यायोगाभावात्तत्संज्ञासिद्धिः इदमेवासत्ववाचकत्वं॥ यथाक्रियायाः
कारकशक्तियोगेप्यसत्वभूतत्वं॥ अन्यथास्वरादीनांसत्ववाचकत्वान्नव्येतीत्यव्यय
मितियोगविभागाभावाद्व्ययत्वंयथान्यासेपिनस्यात्॥ तद्धितश्चासर्वविभक्तिरित्यादिसू
त्रचतुष्टयंनकार्यं॥ येषांप्रत्ययानामव्ययत्वमिष्टंतेसर्वेस्वरादिषुपठितव्याः॥ एवंच
प्राग्रीश्वरान्निपाताइतिसूत्रमपिमास्तु॥ चादयोसत्वेइतिपाठश्चादिप्रतिपादकः॥ निपातपदे
शेचादिग्रहणंकार्यं॥ एवंचमहल्लाघवम्इत्यव्ययानि॥ स्त्रियां॥ अत्रस्त्रीत्वंशास्त्रीय
मेवनतुलौकिकं॥ खट्वातटीसादीनामसिद्धिप्रसंगात्॥ दाराइत्यादौटावादिप्रसंगाच्च
॥ तच्चप्रकृत्यर्थः॥ कौशाद्दिनातेनैवशक्तिग्रहात्॥ अतएवनाथ्येतुक्तंस्त्रियांयत्प्राति
पदिकंवर्त्ततेतस्मात्स्वार्थेटावादयइति॥ यत्तुतत्रलौकिकेः संज्ञेवशास्त्रीयएव॥ तत्त्वं

न चैतु सामानाधिकरण्यसंबंधेन शास्त्रीयविशिष्टलौकिकेन तु केवललौकिकेनापि के
वलशास्त्रीये इत्यस्तु वैयाकरणानयाः॥ तन्न मक्षिकेत्यत्र लौकिकसंबंधेन पुंमक्षिके टा
प्स्यात्॥ यत्तु न च प्रातिपदिकार्थ एव स्त्रीत्वं तस्य च तदर्थ एव ज्यात्यादिमति विशेषणत्वा
न्वयः स्त्रीप्रत्ययास्तु द्योतकाः लिंगस्य च प्रातिपदिकार्थत्वाभावरूपकमेव नात्र ब्राह्मणाद्य
७९ पि ब्राह्मणीसादौ पुंस्त्वबोधकपदाभावेन तद्बोधानुपपत्तेः॥ ब्राह्मणादिपदाज्जातादि
ष्टे च तेनानं नियतमेव लिंगमात्रं तु तात्पर्ययोग्यताधीनं काचित्कं ब्राह्मण्यादौ पुंस्त्वाद्य
बोधादिति वाच्यं। उक्तयुक्त्या पुंस्त्वस्य प्रातिपदिकार्थत्वेपि चतनं तानां प्रातिपदिकानां
स्त्रीत्वार्थकत्वे गौरवात्॥ लाघवेनाप्रीयमाणस्त्रीप्रत्ययानां तदर्थकत्वकल्पनौचित्यात्
॥ अत एव स्त्रीत्वसंग्रहाय प्रातिपदिकार्थेः स्यादौ सूत्रे लिंगग्रहणं कृतं॥ अन्यथा प्राति
पदिकार्थस्य तदंतर्भावेन पृथक्तदुपादानानुपपत्तेः॥ क्वचित्स्त्रीप्रत्ययः स्त्रियाः॥ जा
यत्वेन विशेष्यतया बोधयति॥ शूद्रीत्यादौ भार्यात्वसंबंधविशेषः॥ तत्रैव निरूपकत्वेन ७९
प्रकृत्यर्थान्वयः स्त्रीत्वं योनिमत्वं॥ खट्वा टवी देवतादिपदे च स्त्रीप्रत्ययानार्थबोधकाः॥ तत्र
प्रकृत्यर्थे योनिमत्वस्त्रीत्वस्यायोग्यतया नान्वयादित्याकूणं दाधरादयः॥ तत्रः श्रीः इत्या
दौ स्त्रीत्यप्रत्ययाभावेपि स्त्रीत्वस्य प्रातिपदिकमात्रादपि प्रतीतेस्तस्यापि स्त्रीत्वार्थकत्वप्र
त्ययस्य चेति विपरीतं गौरवापत्तेः॥ किंच स्त्रीप्रत्ययादीनां स्त्रीत्वार्थकत्वे एवाप्स्त्रियामति

४३

ति स्त्रियामजिविहिते व्यावर्कोऽग्नी स्यादावुक्तार्थानामप्रयोग इति ङी पुनः स्यात्॥ द्योतकेषु तु
नैवं व्यतिरुनीनेत्यादौ द्योतकसमुच्चयस्यादृष्टत्वात्॥ अपि चाजेत्यादौ स्त्रीत्वस्य प्रकृत्यर्थवि
शेषणत्वेनान्वयो न स्यात् प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थस्य प्राधान्यात्॥ न चेष्टापत्तिः॥ यद
यो विशेषणतया बोधयंतीति स्वग्रंथविरोधात्॥ स्त्रीत्वविशिष्टाजात्यनुभवविरोधाच्च॥ लिं
गग्रहणप्रत्याख्यानेन तस्य वाचकत्वसाधकोपन्यासवैयर्थ्याच्च॥ यदपि शूद्रीत्यादौ भार्या
त्वेन बोध इत्युक्तं तदपि न॥ न हि तत्र भार्यात्वेनैव बोधः॥ अपि तु कर्मत्वेनापि॥ पुंयोगस्यो
भयत्राविशेषात्॥ शास्त्रीयमपि लिंगं शाब्दबोधे भासते॥ इत्युपस्थितत्वात्॥ एवं च लौकि
कमेव लिंगं शाब्दबोधे भासते न तु शास्त्रीयमिति तान्त्रिकाणां दुराग्रहमात्रं तस्यापि बोधबा
धकाभावात्॥ पंचाशीति॥ न चात्र प्रत्ययविधित्वेन ग्रहणवत्ता प्रातिपदिकेनेत्यनेन च तदं
तविधेः प्रतिषेधात् कथं टापः प्राप्तिरिति वाच्यं॥ अमहत्पूर्वग्रहणेनानुपसर्जनाधिकारे
ण च येन विधिरित्यस्यानित्यत्वज्ञापनेनानयोरनावश्यकत्वमुपपादितत्वात्॥ एतेनामह
त्पूर्वग्रहणेनानुपसर्जनाधिकारेण च स्त्रीप्रत्ययेषु तदंतविधिर्ज्ञाप्यत इति मनोरमाग्रंथ
स्थव्याख्यानग्रंथश्चापास्तः॥ प्रत्ययविधौ प्रतिषेध इत्यस्य बाधेनाग्रहणप्रातिपदिकेत्यस्य
चरितार्थत्वेन ग्रहणवत्येतस्य बाधेमानाभावात्॥ युक्तं च तदंतविधेरनित्यत्वं न तु स्त्रीप्र
त्ययेतदंतविधिः॥ उगिदृच्ग्रहणस्य व्यर्थतापत्तेः॥ स्त्रीप्रत्यये नैव तदंतविधेः सिद्धत्वात्॥ किं

मादिनिर्देशोत्र विशेषणान्नेदे तिमूलव्याख्यानात्स्त्रियामित्येतदजादीनां विशेषणमि
ति तद्व्याख्यानं चायुक्तं॥ बाधकस्याबाधसामान्यविषयत्वेन पंचाजी तत्र विशिष्टस्य जाति
त्वाभावाशयः प्राप्त्यभावात्॥ नन्वेवमजस्य स्त्रीत्वे जातिस्यादिति चेन्न॥ शूद्रस्य स्त्री शूद्री
ति वदिष्टापत्तेः॥ अत एव शूद्राचामहत्पूर्वाजातिरित्यत्र जातिरिति व्यर्थं॥ मुख्ये कार्य
संभवात्कार्तिवासकस्यैव ग्रहणात्पुंयोगे यव नावइति मनोरमायामुक्तं॥ यत्तु शाब्दर
त्नेः पुंयोगेऽजेस्यैव भवितव्यं॥ गौणमुख्यन्यायश्च पदकार्यविषयः॥ एवं च शूद्राचाम
हत्पूर्वाजातिरित्यत्र जातिरित्यावश्यकमिति ध्वनयितुं मनोरमा दूषिता॥ तन्नु न सम्यक्
॥ विशिष्टरूपोपादाने गौणमुख्यन्यायप्रवृत्तेः॥ प्रसिद्धप्रसिद्धि मूलकोहिन्यायः॥ अ
ष्टं चेदमोत्तरत्र भाष्यकौस्तुभादिसकलग्रंथेषु॥ किंच गौणमुख्यन्यायः पदकार्यविष
येन प्रातिपदिककार्ये इत्यत्र मानाभावः॥ फलाभावाच्च॥ पादोन्यतरस्यां अत्र द्विपदीद्वि
पादितीष्यते न तु द्विपदेति॥ ननु शाब्दमाश्रित्य टापि द्विपदेत्यस्यापत्तेः किंच पादयतेः॥
क्विपि पादित्यस्यापत्तिः॥ न चोत्तरसूत्रे एतत्कृच्वाचकत्वाभावेनासंभवात्तदनुरोधेन पूर्वत्रा
पि तस्याग्रहणमिति वाच्यं अश्वसंज्ञानविरोधित्वेन ष्टचवकार्थेः निष्फलेदोषस्य तदवस्थ
त्वात्॥ कश्चित्तूत्तरवाक्येन पूर्ववाक्यार्थनिर्णयोदत्रपतेसत्यजातिकमाति॥ गौणमुख्यन्या
येन लक्षणप्रतिपदोक्तपरिभाषया वा निवृत्तिः॥ उभयोस्तुल्यत्वात्॥ ममतु प्रतिभाति॥ यदा

दित्येकं सूत्रं अन्यतरस्यां ग्रहणं मास्तु॥ पदन्नाशानुङीपद्विपदाद्विपाद इति रूपद्वयस्य सि
द्धत्वात्॥ एवं चानद्विपदेत्यस्य कैवनाप्तो नित्याधवम्॥ न चैवं कृच्चिवा व्यापा टाबुच्चित्य
ते न टाप्येकपदेत्यादिसिद्धावपि पाच्छंदस्येकपादित्यपि स्यादिति वाच्यं॥ टाबृचीत्यनंतर
पाद इत्यपि सूत्रकरणेन पादन्नाशादपि टाब्विधानात्॥ यत्तु कृतसमासांत इति कौमुदी
प्रतीकमुपादाय अंतरसूत्रे कृच्चनिषेधायां तस्यैव संभवे नाथधिकारानुरोधादिति भावः॥
तेन पादयतेः क्विपि बंतस्य ग्रहणं न द्विपदीति॥ कौपादावस्यादिति वक्तव्यात् होमुप्तवस्येति
पादन्नाशांतरलोपस्य तोङिपि पादः पत्॥ टाबृचि॥ पूर्वसूत्रप्राप्तङीपोपवाद इति प्राचः
तच्चिंत्यं॥ ज्ञोपाद्विनापि तिसूत्रस्य भाष्यविरोधात्॥ तत्र हि प्रतिपादविहितसमासांता
न्तं कपो वैकल्पिकत्वेन कब्भावे सावकाशत्वमुक्तं॥ तदीत्यास्यापि पूर्वसूत्रस्यैवैकल्पिक
त्वेन तदभावे सावकाशत्वात्॥ बहुव्रीहेरूधसङ्स्त्रापि भाष्ये स्पष्टमेतत्॥ अत एव ङी
पु प्रातिपदिकादिति सूत्रे पादन्नाह्व समासार्थमिकारांतपदन्नाह्वसंगीकृत्ये तत्रत्याख्यातं
॥ श्रूयते च छंदसि मत्स्याः सप्ताक्षरमेकं पदं॥ एकपाद इति च भाष्योक्तं संगच्छते॥ तदा
हि कृच्यपि एकपदी एकपादितीष्यते एव॥ एवं चैकद्यगित्यस्य सूत्रमते सिद्धये टाहचात्य
त्रोष्यन्यतरस्यां ग्रहणमनुवर्त्य पादंतकृच्यनभिधानमिति तु न भाष्यानुयायः॥ ङीवंत प्रयो
गस्य सूत्रारंभेहस्यापि प्राप्त्वेरिति बोध्यं॥ केवलपाच्छब्दस्य स्त्रियां कृचि चासंभवेन॥

अतदंतविधिश्चरितिनिशा ह्लंदुत्रीखरेउक्रंनवै:॥ तत्रसूत्रमतेपि प्रतिषेधपरत्वेनङीषंवाधित्वाप
रत्वात्टापिकृतेपि एकपदत्वस्यैवेष्टत्वात्॥ टापङीपोपवादइतिवृद्धानांमत्कलत्रंयत्कारणांसंम
तेचेदंतत्रापवादत्वाद्धेत्वविप्रतिषेधेनवाधकपर:॥ एवंचमनोरमापिसंगच्छतइति॥ यदपि
ऊङआपदनेरावर्त्तिनिप्रत्याख्यानमित्युक्तं॥ तदपिन॥ तत्रहिआपाततआपग्रहणप्रत्या
ख्यानमात्रमुक्तं॥ ननुसिद्धांतस्थितिः॥ यद्बलेन सूत्रप्रत्याख्यानंकृत्वापिरूपत्रयमिति
नवदुक्तं संगच्छेत॥ उत्तरत्रभाष्येआपग्रहणस्यान्यार्थतायाउक्तत्वात्॥ वस्तुतस्तुतस्मा
च्चंपूर्वोक्तिमदुक्तार्थरिन्त्वसाधकं॥ तथाहि॥ पदात्रद्विपदीपादस्यतुद्विपात्॥ एवंच
रूपद्वयसिद्धौ अन्यतरस्यांग्रहणंव्यर्थं॥ टाबृचीत्यत्रतुपादोरन्वीतिपाठ्यं॥ तेनपदशा
ब्दात्स्यादत्रारव्दापिकृतेएकपदेस्येकमेवरूपंसकलसंमतं ननुनवीनोक्तरूपत्रयमुक्त
मुमितिरिक्तं॥ प्राचांष्फतद्धितः॥ ननुचतंडीत्यत्रचतंगचेतियञः लुकस्त्रियामितिलुकि
प्रत्ययलक्षणेनयञंतत्वात्ष्फःप्राप्नोतीतिचेन्न॥ ष्फविधावतइत्यनुवृत्त्यावर्णाश्रयत्वे
प्रत्ययलक्षणाप्रवृत्तेः नचतद्धितग्रहणमानर्थक्यंयणी त्यत्रसर्वणादीर्घेणैवसिद्धेरि
तिसंचेत्तत्पयम्॥ कचिदिजंतादपिष्फोनवत्तीतिज्ञापनार्थत्वात्॥ तेनासुरेरुपसंख्यान
मितिसिद्धिः॥ वस्तुतस्तुअत्राधिकारार्थंतद्धितग्रहणम्॥ तेनतद्धिताइत्यधिकारसू
त्रंमास्तु॥ नचोक्तज्ञापकतानस्यातदितिवाच्यम्॥ अन्यत्रकर्त्तव्येइहकरणेनतत्संभवा

त्॥ ननुचेवमूङोपितद्धितत्वात्कुरिरित्यत्रोर्गुणापत्तिरितिचेन्न॥ यस्येतिचेत्यत्रेकारणग्रहणेना
देशानिर्वाभावितस्त्रीप्रत्ययस्यसंतानेतिज्ञापितत्वात्॥ रिघुनादिवत्तइत्येवसंज्ञायांकर्त्तव्यायां
महासंज्ञाकरणेनतेभ्यःप्रयोगेभ्यःहितास्तद्धिताइत्यन्वर्थसंज्ञावलेनापिसिद्धत्वाच्च॥ षङ्गत्य
यस्य॥ यत्तुचुटुषःप्रत्ययस्येत्येकयोगेकर्त्तव्येयोगविभागकरणं चुटू इत्यस्यानित्यत्वज्ञाप
नार्थमितिनवीनास्तन्न॥ षकारप्रश्लेषपरभाष्यविरोधात्॥ वस्तुवस्तुइदंव्यर्थं॥ चुटूइत्य
त्रचुटुष:इतिसूत्रंकर्त्तव्यं॥ नचषोडशोत्यादावपिलोपापत्तिः॥ उपदेशग्रहणेनतन्निरासा
त्॥ तद्देशश्चप्रातिपदिकानांनोपदेशइतिभाष्येणतेषामुपदेशाभावात्॥ प्रातिपदिकान्या
मुपदेशःकर्त्तव्यइतिभाष्यंतुनवस्थैस्तुव्यवस्थापकं॥ तथाग्रहणमजक्षिसादपःषडितिनिर्दे
शान्नप्रत्ययमात्रेकेप्रवृत्तिः॥ जशाकतद्धितेइत्यत्रपर्युदासेनप्रत्ययलाभात्॥ ॥ इतिश्रीम
न्मौनिकुलतिलकायमानगोवर्द्धनभट्टात्मजजानकीजानिरघुनाथभट्टात्मजश्रीकृष्णभट्ट
विरचितायांतर्कचंद्रिकायांस्त्रीप्रत्ययाः॥ ॥ प्रातिपदिकार्थलिंगपरिमाणवचनमात्रे
प्रथमा॥ प्रातिपदिकार्थमात्रेउदैः नीचैः॥ हरिः श्रीः ज्ञानं॥ अत्रलिंगस्यानियतोपस्थितिक
त्वेनप्रातिपदिकार्थत्वात्॥ कृष्णइत्यनुदाहरणम्॥ वासुदेवस्यनियतलिंगत्वेपिप्रातिपदि
कस्यार्थस्यानियतलिंगत्वानपायात्॥ नीलरूपवत्त्वरोयमितिप्रयोगस्त्वसाधुः॥ नकर्म
धारयान्मत्वर्थीयइतिनिषेधात्॥ नचप्रत्ययस्थादितिसूत्रस्थेनासुधतइतिभाष्यप्रयोगेण

कश्चित्कर्मधारयान्मत्वर्थीयस्यासाधुत्वमिति मनोरमायामर्थनिन्द्राद्यारुत्तोकं सम्यक्।। आर्ष
प्रयोगाणां तेन साधुत्वेपि अस्मदादिकृतप्रयोगस्यापि साधुत्वे आपत्तेरूह्यप्रयोग इतिन्यायवि
रोधात्।। अन्यथा न कर्मधारयादित्यस्यापि विधेयतापत्तेः।। नञ्समासस्य कर्मधारयत्वाभावे
८२ नासुधत इति नाप्यस्य साधुत्वे न ज्ञापकाभावाच्च।। अत्र विकं प्रातिपदिकार्थः।। अनियतलिं
गस्थले हि कं प्रातिपदिकार्थः।। तटः तटी तटमित्यादौ तत्र लिंगग्रहणात्सिद्धिः इत्यभिप्राये
णं सूत्रकारेण लिंगग्रहणं कृतम्।। यदि तु नियमांशतात्पर्येण प्रातिपदिकेन वृत्त्या बोध्यत्वमे
व प्रातिपदिकार्थत्वं लिंगं च प्रातिपदिकार्थ इति पक्षस्तदा लिंगेति मास्तु।। परिमाणमात्रे।। द्रो
णो व्रीहिः।। अत्र प्रातिपदिकार्थो द्रव्यं गुणः प्रत्ययार्थः तयोश्च यथायथं भावेनान्वयः।। तथा
च द्रोणाभिन्नं यत्परिमाणं तत्परिच्छिन्नो व्रीहिरिति बोधः।। द्रोणरूपं यत्परिमाणमिति त्वयुक्त
मेव।। गुणादीनां भ्रान्तादात्म्यायोगात्।। तयोस्तादात्म्यमिति मतेन घटोऽयमितिवत्तास्या
न्यविशेषणतावन्नवायथार्थेनेतर्हि कथं निस्तार इति।। यदि तु परिमाणस्य प्रातिपदिकार्थत्वं स्वी ८२
कृत्य प्रातिपदिकार्थमात्रे प्रथमा किं पुनः तल्लिंगनामार्थयोरिति चेद्भेदः स्यादित्याकूतं।। तत्रेदं
वक्तव्यं।। नामार्थयोरभेदान्वयो भेदः नामार्थयोरभेद एव वा।। नाद्यः वैरस्वे देवीस्तोकं पचतीत्यादौ
व्यभिचारात्।। नान्त्यः।। घटपटावित्यादौ व्यभिचारात्।। तस्मात्त्वं न वृत्तिसामानाधिकरण्ये
वैयधिकरण्यस्याप्यभावात्तमसत्तन्मूलकत्वमेतस्याः तथा च प्रकृतेन कोपि दोषः ननु एवं

द्रोणो व्रीहिरिमानयेत्यादि स्यादिति चेन्न।। अभेदबोधस्याव्युत्पत्तेनि परिमाणग्रहणेन पत्रा भेदबो
धे उत्थिताकांक्षा न चैव विप्रथमाविधानात्।। यद्वा नामार्थयोः संसर्गगतिमाभेदसंबंधबोधे
पि समानविभक्तित्वनियमात्।। एवं च परिमाणग्रहणं मास्तु।। युक्तं चैतत्।। अन्यथा द्रोणं
व्रीहिं पश्येत्यत्राभेदः बोधः स्यात्।। यद्वा लक्षणया भेदबोधेनैव बोधः।। न च प्रातिपदिकार्था
तिरिक्ताभेदसंबंधबोधान्वयमानः स्यादिति वाच्यम्।। वाक्यार्थः सः।। तथा च सबात्रा भेदसंबं
धस्य संसर्गतयैव भानं।। न चैवं स्वस्वामिभावादिसंबंधस्यापि वाक्यार्थत्वात्प्रथमापत्तिः तस्य
प्रकारतयैव शाब्दबोधनियमात्।। तथा च संसर्गतया भेदबोधे प्रथमा।। प्रकारतया स्वस्वा
मिभावादिबोधे षष्ठीति विवेकः।। राज्ञः शिर इत्यादौ तु संबंधस्य प्रकारतयैव भानं।। शिलापुत्र
कस्य शरीरमितिवत्।। स्पष्टं चेदं माधवादिकल्पितमित्येतिसूत्रे भाष्ये।। स्पष्टं चेदं प्रातिपदि
कार्थ इह शेष इति सूत्रयोः भाष्ये।। अन्यथा तयोरपि वाक्यार्थत्वाविशेषे प्रथमाषष्ठ्योर्विष
यविभागो न स्यात्।। ननु संबंधस्य भेदघटितत्वाद्भेदस्य संबंधत्वं कथमिति चेन्न शृणु।।
संबंधत्वं स्वेतरार्थान्वयित्वं।। स च संबंधो द्विविधः भेदो भेदश्चेति।। अभेदसंबंधत्वं तु उपाधि
रसंकरत्वेसति उपधेयसंकरत्वं बोध्यं।। एतेनाभेदस्य संबंधत्वं नास्ति भेदघटितत्वात्संबंधस्य
तथापि विशेष्यविशेषणभावो बोध्यः।। अन्यथाषष्ठ्यापत्तेरित्यपास्तं।। अभेदसंबंधातिरि
क्तसंबंधे एवं तेन षष्ठी।। न चात्र भानाभावः राज्ञः शिर इत्यादेश्चोपाधिकभेदप्रतिपादक

नाप्यस्यैव मानत्वात्॥ किंच विशेषणविशेष्यभावेनान्वयएवानेन संबंधः॥ स च घटो घटद्
त्यादौ समानोपाधिकेनसमभिव्याहृतानामुत्पत्तिस्यादौ स्वीक्रियते संबंधत्वं तस्मान्न स्वीक्रियते इ
तिदुराग्रहमात्रं॥ लाघवगौरवाभावात्॥ अर्थे प्रथमैवेत्यसारमिति ग्रंथतः॥ वार्तिककारेण
८३ तु अभिहिते प्रथमेत्युक्तं भाष्ये तु न दूषितं॥ ग्रामं दंडा सत्रे इत्यत्र अधिकरणस्योक्त
त्वात्प्रथमापत्तेरिति प्रौढिवादमात्रम्॥ प्रधानक्रियानिरूपिताननिहिताधिकारेऽपि न कर्त्र
व्य इति महद्भाष्यवम्॥ न च ग्रामानंदः अस्त्रौ भगवः॥ कर्त्रे स्यादौ समासतद्धितकृत्सन्निधाने
तिङ्कृत्ताभावात्प्रथमानस्यादितिवाच्यं॥ तत्रापि अस्तीत्यं वेति परत्वेन तिङाधाराडारेणै
वबोधात्तिङ्कृत्सत्त्वात्॥ एवं च राज्ञः पुरुषोऽस्तीत्यादौ पुरुषनिष्ठकर्तृत्वस्य तिङोक्तत्वात्सुरु
षपदादेव प्रथमानन्तु राजपदात्संबंधस्याविहितत्वादपि षष्ठीनियोगो न एव षष्ठी नानुपयोगिनः प्रथ
मयावाधादित्यपरमतं तत्कृतं॥ अथ एवं बोध्यमेतत्पैवमस्त्रमस्तु॥ अनिर्दिष्टार्थास्वार्थ इति प्राति
पदिकार्थे निविष्यति॥ स्पष्टं चेदं विनञ्ज्ञानानात्मर्थे त्यत्र नाप्यतक्तविनञ्जीयतिरिक्तः
शेष्यस्तत्र षष्ठीति सूत्रार्थात्षष्ठी शेष इत्यत्रापि न दोषः॥ संख्या संबंधातिरिक्तार्थानिन्निधाय ८३
कत्वमात्र प्रातिपदिकार्थबोधकाविनक्तित्वं प्रथमात्वं॥ सुंवादितिकान्यतमत्वं प्रथमात्वं॥
संबोधने च॥ संबोधनं च वक्तृइच्छाविषयत्वं प्रकृत्यर्थसमवेतं॥ प्रकृतशब्दजन्यज्ञानस्यत
थाच वक्तृइच्छाविषयरामसमवेता ज्ञानविषयं मत्कर्मकं रक्षणमिति बोधः॥ ना किं कालत्व

४१

कृत्यवहितशब्दजन्यबोधाश्रयत्वेनेच्छाप्रथमार्थः तादृशेच्छायाः विषयतासंबंधेन प्रकृत्य
र्थविशेषणतया नानं॥ तथा च वक्तृत्वावहितशब्दजन्यबोधाश्रयत्वेनेच्छाविषयो राम इति बो
धः॥ संबोध्यत्वं च समवायसंबंधेन वक्तृइच्छाविषयप्रकृत्यर्थसमवेतप्रकृतशब्दजन्यज्ञाना
श्रयमिति वदंति॥ तन्न॥ संबोधनपदार्थाभावात्॥ यत्तु वैयाकरणनव्याः॥ संबोधनमभिमु
खीकृत्याज्ञातार्थज्ञानानुकूलव्यापारानुकूलव्यापारः॥ न ह्यपाराजन्यज्ञानानुकूलव्यापा
राश्रयत्वं संबोध्यत्वं॥ रामत्रायस्वेति राम संबोधनविषयत्राणमिति बोधः॥ अभिमुखीक
रणं च स्ववचनार्थग्रहणे सादरत्वकरणं तद्व्यंजकं च मुखप्ररोहत्यादास्याकुः॥ तन्न असति
कृष्टेदाहे विधारात्त्ववेत्यादौ नदसंभवात्॥ अत्र मध्यम पुरुषस्तु युष्मच्छब्दाध्याहारेण॥ न
नु नो ब्राह्मणाः चैत्रो गच्छतीत्यादिवत्॥ नो ब्राह्मणास्त्वं पचेत्यापत्तिरिति चेत्तत्पदादीनां परा
मृश्यमानसमानत्वचनत्वनियमात्॥ ननु अकोऽशक्तिनिमित्तवत्त्वे जहतीति चेत्तन्न॥ हता
रामकस्यार्थे दिग्धंजा किंतु मिच्छसीत्यादौ वक्तृसंबोध्ययोरैकत्वेन प्रकृतवाक्यार्थज्ञानस्त्वा
मिदं वक्तृइच्छाविरहाद्रामस्य संबोध्यत्वानुपपत्तिरिति चेन्न॥ आत्मानमात्मना वेत्सीत्यादा
विव लक्ष्मणविशिष्टराममूर्छितलक्ष्मणविशिष्टरामयोर्भेदेन संबोध्यत्वसंभवात्॥ ननु
तिङ्वप्रथमांतसंख्याभिधाने प्रथमायाः संख्यावाचकत्वं किमर्थमिति चेन्न॥ चैत्रो मैत्र
श्च गच्छत इत्यादावाख्यातोपात्तद्वित्वविरुद्धैकत्वसंख्याबोधापत्तेरावश्यकत्वात्॥ प्रथमा

चाकारकविभक्तिः॥ कारकविभक्तित्वं च कारकाधिकारपठितकर्तृकर्मादिसंज्ञामुपजीव्य
विधीयमानविभक्तित्वं॥ क्रियान्वितविभक्तित्वं च वैयाकरणैर्गृह्यते तेन रुधियाविस्यादौ यण्
८४ याचापत्तेः॥ न च सहयुक्तेऽप्रधाने इति सूत्रे भाष्ये अप्रधानग्रहणं प्रत्याख्याय प्रधानात्तृतीयो
पत्तिमात्रं कोपपदविभक्तेः कारककविभक्तिर्बलीयसीत्युक्तं॥ तन्नु क्रियान्वितविभक्तित्वप
क्षे एव संगच्छत इति वाच्यं॥ तत्र कारकत्वाद्दृष्ट्यां न रंगत्वात्॥ अन्यथा शिष्येण सहोपाध्या
यस्य गौरित्यत्रोपाध्यायस्य गव्यन्वितत्वेन क्रियान्वयाभावेनोपपदस्येत्यस्याप्रवृत्त्या तृतीया
पत्तेः एवं पुत्रेण सहोपाध्यायस्य स्थौल्यमित्यत्र गुणेनान्वयेऽपि॥ एवं च भाष्याशयमबुध्वा
यथाक्षरमात्रदर्शनेन प्रथमायामपि कारकत्वमिति व्याख्यानं तः सकलग्रंथविरोधादुपेक्ष्यः
॥इति प्रथमा॥ कर्तुरीप्सिततमं कर्म॥ ननु कर्तृनिष्ठान्यफलेन क्रियया संबध्यमानस्य
कर्मत्वमिति सूत्रार्थः॥ तथा च पितुः स्वर्गोद्देशेन कृतगोदानेनोदानक्रियाफलेन संबद्ध
मिष्यमाणस्य पितुरपि कर्मत्वापत्तिः॥ न च तत्र धात्वर्थानवच्छेदकमिति वाच्यं सूत्रे तदनुक्ते ८
र्गौरवान्नृ॥ तस्माद्धात्वर्थफलशालि कर्मेति सूत्रमस्तु॥ एवं च तथायुक्तं चानीप्सितमि
ति न कर्तव्यमिति महल्लाघवं॥ न चाग्नेर्माणवकं वारयतीत्यादौ माणवकस्यानेनाद्यवाद
त्वात्कर्मत्वं बाधित्वापादानत्वं स्यादिति वाच्यं॥ धात्वर्थफलानधिकरणत्वाद्दौ चरितार्थत्वे
नापादानसूत्रराणिगां दोग्धीत्यत्रेवापादानं बाधित्वापरत्वात्कर्मत्वापत्तेः॥ धात्वर्थत्व

प्रवृत्तिध्वंसानुकूलो व्यापारः॥ भाष्ये सूत्रप्रत्याख्यानेन दोषाभावाच्च॥ एतेन धात्वर्थप्रत्यये
त्याद्यावत्त्पकत्वादित्यंतः मनोरमायां यथः अग्नेरिति मतिकमुपादायेप्सिततमपदाभावे वार
णार्थानामिति सूत्रे तदपवादत्वापत्तेः॥ न चाग्नेर्तच्चरितार्थं॥ तस्मादिदं तदुपस्थाप्य संयोगरू
पफलाश्रयत्वात् वारयतेश्च संयोगानानुकूलव्यापारानुकूलव्यापारोऽर्थः॥ तत्रापीप्सितत्र
हः क्रियान्नाह एव॥ ईप्सिततममित्युक्तावीप्सितमात्रे भावकात्वस्य परत्वादीप्सिततमेन बा
धः॥ ईप्सिततमत्वं च प्रकृतधात्वर्थप्रधानीभूतव्यापारप्रयोज्यप्रकृतधात्वर्थफलाश्रयत्वं
॥ अत एवाग्नेर्नोदं रूपप्रतीतिस्त्वत्रेति भावः इत्यंतमस्या व्याख्यातस्यं ग्रंथस्यापास्तः॥ संयोगस्य फल
कोटौ निवेशे गौरवात्॥ यवनिष्ठगोसंयोगाद्यनुकूलगोमागपितित्वरूपव्यापाराभावानुकूल
व्यापारविवक्षायां यवप्रतियोगिकगोनुयोगिकसंबंधसत्त्वाद्यवान् गोसो वारयतीति प्रयोगा
पत्तेश्च॥ प्रवृत्तिध्वंसस्य धात्वर्थत्वे तु तस्याश्चेतननिष्ठत्वान्न तादृशप्रयोगः एवं च प्रवृत्तिर्वि
संयोगाद्यनुकूलव्यापारस्यापि तु कृतित्वजातिविशेषः॥ अखंडोपाधिर्वा॥ तथा च कृतित्व
स्यैव प्रवृत्तित्वस्य लघुधर्मस्याभावप्रतियोगितावच्छेदकत्वसंभवे संयोगाद्यनुकूलव्यापार
त्वस्य गुरुधर्मस्याप्रतियोगितावप्रतियोगितावच्छेदकत्वं संभवे संयोगाद्यनुकूलव्यापारो
त्वस्य गुरुधर्मस्य प्रतियोगितानवच्छेदकत्वेन लाघवाच्च॥ यवोद्देशेनाभावानुकूलव्यापारो
वारयतेरर्थः॥ इष्टाभावानुकूलव्यापारो वा॥ अत्र कारके इत्यधिकारात्कारकस्य पुत्रं पं

यानं पृच्छति त्यादौ व कथितं चेत्यनेन ब्राह्मणस्य पुत्रविशेषणत्वेन क्रियान्वयाभावात्कर्म
संज्ञा॥ कारकत्वं च कारकाधिकारपठितसंज्ञावत्त्वमेव॥ ननु क्रियान्वयित्वं प्रथमाया अपि
कारकत्वापत्तेः॥ न चेष्टापत्तिः॥ संबोधनांतकर्त्तोर्थः कारकं प्रथमो भवति॥ धातुसंबंधाधि
८५ कारनिष्पन्नमसमस्तनन्त्रित्यादौ संबोधनपदस्यासमर्थतापत्तेः॥ कृत्वोर्थादीनामपि क्रिया-
न्वयित्वे कारकत्वापत्तेः॥ तथा च पितुर्वज्ञेरित्यादौ यण्णापत्तिः॥ कारकाद्दत्तश्रुतयोरि
त्यादौ कारकशब्देस्वरितत्वाश्रयणे गौरवाच्च॥ किंच क्रियान्वयः साक्षात्परंपरासंबंधे
नापि॥ नाद्यः सप्तम्या अकारकत्वापत्तेः॥ नांत्यः षष्ठ्या अपि कारकत्वापत्तेः॥ सप्तम्याः कर्तृ
कर्मद्वारकक्रियान्वयः षष्ठ्याश्च नेति॥ अत्र विनिगमकत्वाभावात्॥ न च तदन्वययोग्यताव
च्छेदकक्रियाजनकत्वं विवक्षितं संबंधस्य तेन वानव्याख्यानमपि युक्तं॥ षष्ठ्यादिव्याप्ते अन्वययोग्यता
याः वक्तुमशक्यत्वात्॥ मदुक्तलक्षणे तु कारकाधिकारस्थ चेत्तत्त्वयविधसंबंधलक्षणे न कोपि
दोषः॥ षष्ठ्यास्तदधिकारपठितत्वाभावात्॥ तथापि तत्स्वीकारे प्रथमायास्त्वकारकत्वाप
त्तिः॥ तथा च नवत्सिद्धांतहानिरिति दिक्॥ हरिं भजतीति॥ एककर्तृका हरिनिष्ठप्रीत्यनुकू
ला क्रियेति बोधः॥ तिङंते सर्वत्र फलनिष्ठप्रकारतानिरूपितविशेष्यतायाः सर्वैः क्रियायां
स्वीकारात्॥ एवं च हरिः सेव्यत इत्यत्रापि पूर्वोक्त एव बोधः पूर्वोदाहरणे द्वितीया कर्मबो ८५
धिका द्वितीये तु आख्यात इति विशेषः॥ तार्किकास्तु जनकनिष्ठक्रियाजन्यप्रतिश्रयो हरिरि

५८

ति प्रथमांतार्थविशेष्यकबोधमाहुः॥ तन्मते क्रियाप्रधानमाख्यातं सत्वप्रधानानि नामा
नीति वचनविरोधः॥ आख्यातसंख्याप्रकारकबोधं प्रति प्रथमांतपदजन्योपस्थितिः का
रणमिति पदद्वयघटितकार्यकारणभावकल्पने गौरवं च॥ नवीनास्तु कालुजनकनि
ष्ठक्रियाजन्या हरिनिष्ठा प्रीतिरिति फलविशेष्यकं॥ बोधमाहुस्तन्न॥ मनोरमादिसक
लग्रंथविरोधः॥ क्रियाप्रधानमिति वचनविरोधश्च क्रियात्वं च फलनिष्ठकार्यतानिरू
पितकारणतावच्छेदकतया सिद्धो जातिविशेषः अखंडोपाधिर्वा॥ न च फलेऽस्त्विति न च व
नं संगच्छेत॥ क्वचित्फलेपि प्रयोग लुप्तिंहोमाणवक इतिवत्कोशेण॥ किंच फलस्य क्रियात्वे
विशेष्यत्वे च तत्रैव प्रकृत्यर्थविशेष्यत्वेन वर्त्तमानत्वादेरन्वयः स्यात्॥ किंच प्रधानान्त
न्धात्वर्थव्यापाराश्रयत्वेनौदनादेः कर्तृत्वं स्यात्॥ तस्मात् देवदत्तादेरप्रधानव्यापाराश्र
यत्वात्॥ किंच पाको भवतीत्यर्थे पचति भवतीत्यस्यैव विकृत्यनुकूलक्रियां पक्वेपत्यर्थेपि
च्यते पक्वेपत्यस्यापि साधुत्वमिष्टं तत्र फलस्य विशेष्यत्वेन स्यात्॥ न च सुप आत्मनः क्यजिति
सूत्रस्थभाष्यानुरोधात् तथाव्याख्यानमिति वाच्यं॥ तस्यानतिप्रायकत्वात्॥ तथाहि॥ त
त्रेष्यते पुत्र इत्यत्र पुत्रमिच्छतीत्यत्रेव वाक्यापत्तिमात्रं कानित्यार्थत्वादिति समाहितं॥
तत्र पुत्रीयतीत्यस्माद्यावानर्थः प्रतीयते कर्तृकर्मादिरूपः स सर्वोपि पुत्रमिच्छतीत्यस्मा
त्पदद्वयघटितवाक्यादपि प्रतीयते॥ इष्यते पुत्र इति वाक्यात्तु न कर्तृप्रतीतिरिति नित्यार्थत्वम्

त·चं·कु· नचतत्राधिकत्वापेक्षेपात्समानाधर्यत्वं॥ तावता स्वदस्यघटितविग्रहे चरितार्थो विधिः प
दत्रयघटितविग्रहे न प्रवर्त्तत इत्यभिप्रायात्॥ स्यात्फलविशेष्यकोबोधः संगत इति दिक
॥ स्पष्टं चेदमस्मत्कृताख्यातवादे॥ ननु सर्वत्र तिङ्‌तेः क्रियायाः प्राधान्यत्वस्वीकारे पचरूपम
८६ गोधावतीत्यादावेकवाक्यता स्यादिति चेन्न॥ तिङ्‌तं प्रत्यप्राधान्यान्नाविपि क्रियांतरं प्रत्य
प्राधान्ये बाधकाभावात्॥ उक्तं च भुवंतं च यथानेकं तिङ्‌तस्य विशेषणं॥ तथा तिङ्‌तम
प्याकुल्लिङ्‌तस्य विशेषणमिति तथैकतिङ्‌तार्थमुख्यविशेष्यत्वादेकवाक्यत्वसंगच्छते
॥ ताक्तिकरीत्या तं पचरूपेति क्रियाध्याहारे गौरवं नामार्थस्य मृगस्यापि नञ्कार्थमिश्रीकृत्यभे
दसंबंधेन क्रियान्वयासंभवाच्च॥ न च पचरूपलक्षणपंपायां बकः परमधार्मिक इत्यत्रेदवा
क्यार्थस्य कर्मत्वान्नामार्थत्वाभावेन विनञ्कार्थमहारीकृत्यापिभेदसंबंधेनान्वयसंभवान्न ८६
वाक्यभेदेन तत्र मिस्याध्याहार इति वाच्यम्॥ वाक्यार्थस्य नामार्थातिरिक्तत्वाभावेनोक्तदोषस्य
तदवस्थत्वात्॥ अन्यथा राज्ञः पुरुषपचरूपेत्यत्राप्येकवाक्यतया साधुतापत्तिः॥ तस्मात्सर्व
त्र नमितिपदाध्याहारेणैव बोधः॥ तथा च वाक्यभेद इति गौरवम्॥ न च प्रामाणिकं गौरवं
न दोषायेति वाच्यं॥ प्रकृतेपि वाक्यभेदस्वीकारे पचरूपतेमृग गोधावतीति प्रयोगो न स्यात्॥
अस्तु वाक्यार्थातिरिक्तः॥ तथापि राज्ञः पुरुषः पचरूपेति प्रयोगेप्येकवाक्यतापत्तिः॥ न
चेष्टापत्तिः॥ तिङ्‌ तिङ्‌ इति निघातापत्तेः॥ न च तिङ्‌तार्थविशिष्टस्यैव तिङ्‌तार्थप्रत्यन्वय ए

वं वाक्यार्थस्य कर्मत्वस्वीकारान्न प्रकृते दोष इति वाच्यं॥ पुरीमवस्कंद लुनीहि नंदनं मुषाण
रत्नानि हरामरांगनाः॥ विगृह्य चक्रे नमुचिद्विषा बलीय इत्थमस्वास्थ्यमहर्निशं दिवः इत्यादा
वपि विशिष्टस्य कर्मत्वादसाध्यपदोत्तरं द्वितीया न स्यात्॥ गौरवस्योक्तत्वाच्च॥ तस्मात्पचरूप
मृग गोधावतीत्यादौ वाक्यार्थस्य कर्मत्वमिति तन्न किं कनव्योक्रम पुत्क्रमिति दिक्॥ अभिहिते
त्विति॥ पक्तुमोदनं तु क्ते इत्यत्र प्रधान तुमर्थनिरूपितकर्मत्वस्यानभिहितत्वाद्द्वितीया॥
ग्रामो गंतुमिष्यत इत्यत्र तु प्रधानेच्छत्वार्थनिरूपितग्रामनिष्ठकर्मत्वस्याख्यातेनाभिधानान्न द्वि
तीया॥ ननु इच्छतेः तुमुनं तं कर्मन ग्राम इति चेन्न॥ इषेरुभयकर्मणीति भाष्यालेखलग
मनइच्छाभावाच्च॥ एवं स्थितेप्यभिनिविश्यते मार्ग इत्यत्रापि तिङ्‌तोपात्तक्रियानिरूपिता
धिकरणत्वस्याख्यातेनाभिहितत्वात्प्रधानस्थितिनिरूपिताधिकरणत्वस्याख्यातेनाभिधानेपि तस
प्तमी प्रधानानुरोधस्यान्याय्यत्वात् स्थितिक्रियां प्रति शब्दज्ञानन्वयाभावाच्च॥ पक्तुं तुम्यत इ
त्यत्र तु यत्र शाब्दान्वयस्तन्निरूपिताभिधानाभिहिते॥ शाब्दबोधे शाब्दान्वयस्यैव प्राधान्या
त्॥ एवं हन्तुमपि तु शक्यते हरिर्हरिवेत्तुं नयं साधु॥ ओदनं पक्तुं ग्रामो गम्यते देवदत्तेने
त्यत्र बोधनयत्र शाब्दान्वये ओदनं पक्तो देवो नुम्यते इति प्रयोगः साधुरेव॥ एतेन सादुमि
णमुल्लिति सूत्रस्थं भाष्यं तुमुनः समानाधिकरणे इत्यादि तत्र हि विकल्पमित्यंतं पूर्वपक्ष
भाष्यमात्रित्याश्रयते भावे इत्यादि तुमर्थ इति वचनेन तुमर्थस्य कः भावे इति सिद्धांत

तर्कचं॰प्र॰ नाप्यानुमास्तिवस्तुतत्त्विमादिमनोरमाखंडनपरनवीनग्रंथोऽपास्तः॥ प्राप्तानंद इतिसमा
सेएकार्थीभावाद्विशेषणविशेष्यभावव्यत्यासेनानंदकर्तृकप्राप्तिकर्मीभूत इति बोधः॥
नवीनास्तु विशेषणविशेष्यभावव्यत्यासमनिच्छंतः प्राप्तिकर्तृ आनंदकर्मेति बोधमाहुः तत्र
८७ च विशेष्यतन्निरूपकत्वबाधेन विशेषणे पर्यवसानं स्वर्गविधिनिषेधौ विशेषणमुपसं
क्राम[illegible]सति विशेष्ये बाधे इति न्यायेनेति वीकृतः सच निर्युक्तिकः स्वार्थ्यादि इति वस्त
तु रूप[illegible]गो निसित्वादीनामपि विशेषणीभूतजाति[illegible]यसाधुतापत्तेः॥ नचेष्टापत्ति
[illegible]तातत॥ अस्तु वा सन्यायः तथापि तस्य विशेष्यवाचकपदसमभिव्याहारात
रिक्तविषयत्वमेव न्याय्यं॥ अन्यथा शिखी देवदत्तो ध्वस्त इत्यत्रापि शिखाभासत्वापा
त्तेः॥ एवं चात्रापि विशेष्यवाचकः पदसमभिव्याहारसत्वान्न्यायस्याप्राप्तिरित्यभिप्रा
येणैव मनोरमायां तथोक्तं॥ समासे एकार्थीभावस्यावश्यकत्वादयुक्तं समासक्लेशोपातीति
दिक्॥ ॥श्रीरस्तु॥ ॥श्रीकल्याणमस्तु॥ ॥श्री॥ ॥छ॥ ॥छ॥

प्रभवेऽब्दे ज्येष्ठासितसप्तम्यां लिखापितं जोड्योपाख्य घनश्यामेनेति श्रीरस्तु